Shri Raghunatha Temple MSS. Library,
JAMMU

No. १२५३ घ

Title न्यायसिद्धान्तमञ्जरीटीका भावदीपिका

Author कृष्णन्यायवागीशः गोविन्दपुत्रः

Extent ६३ पत्राणि Age

Subject न्यायवैशेषिकम्

न्यायसिद्धांतमंजरी व्याख्या

१२ पत्र

ननु साहित्यं ननु तुल्यवदेकक्रियान्वयित्वरूपं साहित्यं न नु पत्न्यानिरूपकं साहित्यं कुतो नास्ती
त्यत आह । यागादाविति । अनुमतिद्वारा सम्मतिद्वारा । तुल्यवदन्वयादिति । ननु यथा मंत्रपाठ
कृति प्रक्षेपादिद्वारा यागादावन्वयस्तथा न पत्न्या इति भावः । अत्राहुरित्यनेनास्वरसः सूचितः
न द्वीजं तु धववत्स्वदिरावित्यादौ इतरेतरद्वंद्वे धववत्स्वदिराविति स्वरूपद्वयप्रतीतिर्ननु साहित्य
प्रतीतिरिति । न च धववत्त्वं स्वदिरत्वं च धर्मितावच्छेदकीकृत्य द्वित्वान्वये धववद्रूपस्य स्वदिर
द्रूपस्य च बोधप्रसंगः । अतः साहित्यं धर्मितावच्छेदकीकृत्य द्वित्वान्वयबोधार्थं साहित्याभ्यु
पेतलक्षणावश्यकेति वाच्यं । धववत्त्वं स्वदिरत्वं च धर्मितावच्छेदकीकृत्य द्वित्वान्वयबोधानंगीका
रात् । किं तु धवस्वदिरयोर्निर्धर्मितावच्छेदकद्वित्वान्वयबोधांगीकारात् । अत एव चंद्रेकलंकः
३ सुजने दरिद्रता विकाशान्न लक्ष्मीः कमलकुचं चलाः सुरवाप्रमादः सधनेषु सर्वदायज्ञोविधावुः

१५
19

रूपयंतिरथंतुिनमित्यादौकल्पकत्वादिषु समूहालंबनस्मृतिविषयेषु बहुत्वान्वयः। तत्रमेतत्कोप
स्थापकद्वंद्वाभावात्। नीलाभेदस्य नीलगुणाश्रयतादात्म्यस्य अन्वयविधयैव संसर्गमर्याद
येवाअवभासनोपपत्तेः शाब्दबोधोपपत्तेः योग्यताज्ञानादिरूपकारणाबलादितिभावः। कर्मधार
येनशक्तिः नीलोत्पलेत्यादिसमुदायेनशक्तिः। नवाल्लक्षणेति। नीलोत्पलेत्यादिसमुदायेनी
लोत्पलेत्यादिसमुदायघटकपदेवानलक्षणेत्यर्थः। अत्रयद्यपिनीलपदस्यनीलगुणाश्र
येलक्षणावश्यकीनीलपदस्यनीलगुणपरत्वेउत्पलपदार्थेनसहाभेदासंभवेनकर्मधार
यासंभवः। तथापीयंलक्षणान समासप्रयुक्ताअपितुलाक्षणिकपदेनसहसमासः। अतएव
कर्मधारयेलक्षणाविरहादेव। ननुतत्पुरुषस्यकुतोगुरुत्वमतआह। तत्रेति। तत्रराज
पुरुषइत्यादितत्पुरुषसमासेपूर्वपदेनाज्ञादिपदे। संबंधिनिराजादिसंबंधिनि। लक्षणाम

गोत्युक्तंपूर्वमुक्तं। घटसंबंधिपदं प्रतियोगितासंबंधेन घटसंबंधिपदं अन्योन्याभावे शक्तमेवेति।
अन्योन्याभावेपि शक्तमित्यर्थः। लाघवेनान्योन्याभावभिन्नाभावत्वरूपसंसर्गाभावत्वापे
क्षयाऽन्योन्याभावत्वस्य लाघवेनान्योन्याभावत्वस्यापि नञ्पदशक्यतावच्छेदकतयेतिबो
धः। ननु संसर्गाभावत्वेनान्योन्याभावभिन्नाभावत्वं किंत्वतिरिक्तमखंडोपाधिरूपं न द्वपेक्षया
तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वं न लघ्वित्यत आह। विनिगम
नाविरहेणाचेति। संसर्गाभावत्वस्याखंडोपाधिरूपत्वेऽन्योन्याभावत्वमपि अतिरिक्ताखंडोपाधि
रूपमेव स्वीक्रियते। तथा च विनिगमनाविरहेण संसर्गाभावत्वमन्योन्याभावत्वं चोभयमेव
नञ्पदशक्यतावच्छेदकमिति भावः। अथवा लौकिकत्वेन संसर्गाभावत्वापेक्षया अभा
वत्वस्य लाघवेन नञ्पदशक्यतावच्छेदकत्वे येतिबोधः। नन्वभावत्वस्य नञ्पदशक्य

तावच्छेदकत्वेन नञ्पदादभाववत्वेन नत्वपेण बोधः स्यात् न त्वन्योन्याभावत्वेन संसर्गाभावत्वेन वा
न चान्वयानुपपत्तिरिति वाच्यं। भूतले घटो नास्ति घटः पटो नेत्यादिवाक्यजन्यबोधानंतरं भूतलं
घटसंसर्गाभाववन्न वा घटः पटभेदवन्न वेति संशयापत्तेरित्यत आह। विनिगमनाविर
हेणाचेति। अखंडोपाधिरूपसंसर्गाभावत्वस्याखंडोपाधिरूपान्योन्याभावत्वस्य च न
ञ्पदशक्यतावच्छेदकत्वे विनिगमनाविरहेणाचेत्यर्थः। अभावमात्र एव संसर्गाभावान्योन्या
भावयोः। तच्छक्यत्वावधारणात् नञ्पदशक्यत्वावधारणात्। न घटः पट इति वदिति। न
घटः पट इत्यत्रेवेत्यर्थः। अघटः पट इत्यत्रापीति शेषः। अभावघटयोरन्वयोपपत्तेः अभा
वघटयोः प्रतियोगितासंबंधेनान्वयोपपत्तेः। नघटपदेपीति। अपिनानञ्पदस
मुच्चयः। नस्यान्योन्याभावशक्यत्वेन लाक्षणिकत्वाभावात् नामार्थयोः प्रातिपदिकार्थयोः। राम

अभेदान्वयस्याभेदेन तादात्म्येनान्वयस्यैवानुत्पत्तेः आकांक्षालभ्यत्वात्। तथाहि
नामार्थनिष्ठाभेदसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबोधं प्रति
प्रत्ययभिन्नपदजन्योपस्थितिर्विशेष्यतासंबंधेन हेतुः। एवं नामार्थनिष्ठाभेदातिरिक्त
संबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबोधं प्रति प्रत्ययजन्योप
स्थितिर्विशेष्यतासंबंधेन हेतुः अतो न नामार्थयोर्भेदेनान्वयः। न वा नामार्थप्रत्यया
र्थयोरभेदेनान्वय इति। कथं तर्हि इति। तर्हि नामार्थयोरभेदेनैवान्वयाभ्युपगमेन घ
टः पटः इत्यत्र कथमन्वय इति चेन्न नाकांक्षणयोरिति। न घटघटपदार्थनभूपदार्थयो
रभेदेनैवान्वय इति भावः। न तु घटपदस्य घटप्रतियोगिकेन समं गोद्वाराल्लाघवात् घट

तदभावयोरन्वयोपपादनासंभवाच्चाह। प्रथमायां वेति। घटपदोत्तरप्रथमायां वेत्यर्थः। षष्ठ्यर्थे प्रतियोगितालक्षणासंबंधे तर्हि सुप्तिभक्तौ लक्षणानंगीकारे षष्ठ्यातः कर्मताप्रत्यय इत्यर्थः। ननु संबंधसामान्यशक्तायाः षष्ठ्याः कर्मतायां न लक्षणा किंतु शक्तिरेव कर्मतायाअपि संबंधत्वदत आह। कथंवेति। प्रतिबंधिबाहुल्यप्रदर्शनायवाह। कथंवेति। एकस्यास्त्रियां बहुवचनमिति। तत्र बहुत्वबाधादेकत्वे बहुवचनस्य लक्षणेति भावः। अनुशासनकौ कर्तृकर्मणोः कृतीत्याद्यनुशासनसिद्धाइयं लक्षणा षष्ठ्याः कर्मतायां लक्षणा बहुवचनस्यैकत्वे लक्षणातुल्यमिति। यथा षष्ठ्याः कर्मतायां लक्षणा अनुशासनकी तथा प्रथमायाः षष्ठ्यर्थे लक्षणाप्यानुशासनिकी वा। ननु षष्ठ्याः कर्मतायां लक्षणा नियामकमनुशासनं कर्तृकर्मणोः कृतीति सूत्रं स्पष्टमेव। प्रथमायाः षष्ठ्यर्थे लक्षणा नियामकमनुशासनं किमित्यत आह। तदिदमाहुरिति। वैयाकरणा इति शेषः। तथा च वैयाकरणास्तत्र प्रथमायाः षष्ठ्यर्थे लक्षणा नियामकमनुशासनमिदं वक्ष्यमाणमाहुः। अनुशासनमेव दर्शयति। नियतप्रयोगा हि के

चिदव्ययादिस्तीति। नियतः प्रयोगो येषां ते नियतप्रयोगाः। तेषामयमाशयः। न घटः पट इत्यादौ भूतले न घट
इत्यादौ च नञ्पदं प्रथमान्तघटादिपदसमभिव्याहार एव प्रयुज्यते न तु षष्ठ्यन्तघटादिपदसमभिव्याहा
रेतान घटस्य पट इत्यस्य भूतले न घटस्येत्यस्य चाप्रयोगात्। तथा च नियतप्रयोगा हि केचिदव्ययादिस्त्य
नुशासनमेव प्रथमाद्यर्थः। प्रत्ययार्थे लक्षणानियामकमिति भावः। तथापि घटपदस्य घटप्रतियोगि
के प्रथमायां वा षष्ठ्यर्थे लक्षणांगीकारेपि नञर्थपटयोः न घटः पट इत्यत्र नञर्थपटयोः कथमा
श्रयाश्रयिभावेनान्वय इति। नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादिति भावः। षष्ठीलोपं न घटः
पट इत्यत्र नञुत्तरषष्ठीलोपं। ततः न घटः पट इति वाक्यात् अर्थप्रत्ययात् नञ्पदार्थपटपदा
र्थयोः संसर्गप्रत्ययात् अभाववल्लक्षकमिति। अन्योन्याभाववल्लक्षकमित्यर्थः। तथा च नञ्पदार्थ
पटपदार्थयोरभेदेनैवान्वय इति भावः। घटप्रतियोगिकस्येति। प्रथमालक्ष्यार्थसंबंधस्येति शेषः। अ
भावे अन्योन्याभावे। नस्य अभावस्य पदार्थैकदेशत्वात्। नञ्पदार्थतावच्छेदकत्वात् ससंबंधिकत्व इति

अभावस्यापि स्वसंबंधिकत्वादिति भावः। चैत्रस्य पितेत्यादावेति। पितृशब्दार्थो जनकपुमान् तदेकदेशज
नकत्वे चैत्रस्यान्वयः। समुदाय एवेति। अन्योन्याभावे स्वार्थः। इतरपदार्थान्वयः। घटपदार्थान्वयः। परंपरासं
बंधेन स्वप्रतियोगिकाभावत्वसंबंधेन। आहुरिति स्वस्व स्वत्वं तु इतरपदार्थस्य घटादेः स्वप्रतियोगिका
भावत्वरूपपरंपरासंबंधेनान्यपदार्थे अन्योन्याभाववति अन्वयासंभवः। नामार्थयोर्भेदेनान्वयस्याव्यु
त्पन्नत्वात्। यदि तु घटपदस्य घटप्रतियोगिकाभावत्वलक्षणापरंपरासंबंधेन संबंधिनि लक्षणा
तस्य च तादात्म्यसंबंधेनान्यपदार्थान्योन्याभाववति अन्वय इत्युच्यते। तदानीं तद्दोषः किंतु न घटः पट इति
वाक्यजन्यबोधानंतरं पटो घटप्रतियोगिकभेदवान्न वेति संशयः स्यात् पटे घटप्रतियोगिकभेदत्वेन
रूपेण घटप्रतियोगिकभेदस्यानिश्चयादिति दोषो वसेयः। युक्तं चैतत्। समीचीनं चेत्यर्थः। अभावव
त्त्वलक्षकत्वमेवेति। नञ्पदस्यान्योन्याभाववल्लक्षकत्वमेवेत्यर्थः। एवकारेणान्यपदोत्तरलुप्तषष्ठी
स्मरणस्य नियतत्वे विलक्षणाव्युत्पत्तेः अव्यवच्छेदः अन्यथा अभाववल्लक्षणत्वाभावेन नञ्पदोत्तम

त्त्वलुप्तषष्ठीस्मरणोनिपातस्थलेविलक्षणाव्युत्पत्तिअंगीकारेवेतिपावदसमानविभक्तिकतानु

पपत्तेरिति। एकधर्मिबोधकत्वरूपसामानाधिकरण्याभावात्। विशेष्यविशेषणभावे तत्र विशे

षणांतत्रलिंगादपः प्रायोविशेष्यस्थादिशेषणोइत्यनुशासनेन विशेषणपदोत्तरं विशेष्यप

दोत्तरविभक्तिसमानविभक्तिविधानात्। निपातस्थले अन्यैवव्युत्पत्तिरितिनिपातार्त्तिरिक्ता

ति नामार्थयोर्भेदेनान्वयोऽव्युत्पन्नः तथाचनिपातातिरिक्तनामार्थनिष्ठतादात्म्यातिरिक्तसंबंधा

वधावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेनशाब्दबुद्धित्वावच्छिन्नंप्रतिप्रत्ययनिपा

तान्यतरजन्योपस्थितिःकारणं। निपातार्थनिष्ठतादात्म्यातिरिक्तसंबंधावच्छि

न्नप्रकारतानिरूपितविशेष्यतासंबंधेनशाब्दबुद्धित्वावच्छिन्नंप्रतिनुपदजन्योपस्थि

तिःकारणमितिभावः। इतिविलक्षणाव्युत्पत्तिरूपहेतोः। घटतदभावयोरिति। घटतदभाव

पदयोश्चेतिशेषः। प्रतियोग्यनुयोगिभावेनेति। आश्रयाश्रयिभावेनेवेतिशेषः। प्रतियोगित्वानुयोगित्वानु

गित्वाभ्यां आश्रयत्वाश्रयित्वाभ्यां चेति तदर्थः। न घटादिपद इति। आदिपदेन नञ्पदपरिग्रहः। अत एव निपातस्थले विलक्षणव्युत्पत्तेरेव। चंद्र इवार्थयोर्भेदेनान्वय इति इवपदार्थे भेदाश्रयत्वे सति धर्मवत्त्वरूपसादृश्ये चंद्रपदार्थस्य चंद्रस्य प्रतियोग्यनुयोगिभावेनाधेयत्वेन वान्वय इत्यर्थः। अत एव निपातस्थले विलक्षणव्युत्पत्तेरेव। घटतदभावयोरन्वय इति। घटतदभावयोः प्रतियोग्यनुयोगिभावेनान्वयप्रसिद्धिरित्यर्थः। निष्कलंकः निर्दुष्टः। मानाभावान्न निपातस्थले विलक्षणा। व्युत्पत्त्यंगीकारे मानाभावान्न। ननु निपातस्थले विलक्षणव्युत्पत्त्यंगीकारे कथमिवपदार्थसादृश्ये चंद्रपदार्थस्य चंद्रस्य भेदेनान्वय इत्यत आह। चंद्र इव मुखमित्यादिवित्ति। तत्र दृशालक्षकं चंद्रसदृशालक्षकं तात्पर्यग्राहकं च पदे द्रष्टव्ये चंद्रसदृशप्रतीतीच्छयोच्चरितत्वादिरूपतात्पर्यग्राहकं। अत एव इवपदस्य तात्पर्यग्राहकत्वेन चंद्रपदस्य चंद्रसदृशलक्षकत्वादेव। चंद्रमिव मुखं पश्यामीत्यत्र द्वितीयेति। चंद्रपदोत्तरं द्वितीयाविशेष्येणासहैकार्थकत्वेन निरुक्तानुशासनप्रवृत्तिसंभवादिति भावः। अन्यथा चंद्रपदस्य चंद्रमिव मुखं पश्यामीत्यादौ चंद्रपदोत्तरद्वितीयानुपपत्तेरित्यर्थः। विशेष्येणासहैकार्थत्वाभावेन निरुक्तानुशासनप्रवृ राम

त्यसंभवादिति भावः। इदमुपलक्षणं। निपातानां वाचकत्वे काव्यादावन्वयो न स्यात्। तथा हि। शशैरुस्ते
रिवोदीच्यानुद्ददिष्यन्नूरसानि वेत्यादौ उक्तसरशैः शशैः रससरशानुदीच्यानूढाद्रक्ष्यसीत्यर्थः। अपं
चोक्त्यादिशब्दानां उक्त्यादिसदृशपरत्वे इवशब्दस्य तात्पर्यग्राहकत्वरूपद्योतकत्वे एव संगच्छते। वि
शेष्येणाशरेणासहैकार्थ्यत्वादुक्तपदोत्तरतृतीयोपपत्तेः। इवशब्दस्य सादृश्यवाचकत्वे तु उक्तशब्द
स्य विशेष्येणाशरेणासहैकार्थ्यत्वाभावादुक्तपदोत्तरतृतीयानुपपत्तिः। एवं वागर्थाविव संपृक्तौ पा
र्वतीपरमेश्वरौ वंदे इत्यत्र वागर्थयोर्विशेष्याभ्यां पार्वतीपरमेश्वराभ्यां सहैकार्थ्यत्वाभावाद्वागर्थ
पदोत्तरद्वितीयाद्विवचनानुपपत्तिरित्यादिकं सुधीभिर्विवेचितव्यमिति दिक्। ननु चंद्रपदस्य चंद्रस
दृशे लक्षणायां गौरवादिवशब्दस्य नैयर्थ्यापाताच्चाह। अस्त्विवेत्यादि। विभक्त्यर्थ एव संबंध एव। विभक्तौ लक्षणे
ति। चंद्रपदोत्तरप्रथमाविभक्तेर्लक्षणेत्यर्थः। ननु सुपि विभक्तौ न लक्षणेत्यत आह। अनुशासनानुग्रहा
दिति। नियतप्रयोगाः केचिदव्ययाः इत्यनुशासनानुग्रहादित्यर्थः॥ चंद्र इव मुखमित्यत्र प्र

योगान्न चंद्रस्येव मुखमित्यप्रयोगाच्चेति भावः। ननु चंद्र इव मुखमित्यत्रैवेवार्थे चंद्रमिवेति चेन्न।
लिंगसंख्याविभेदेषूपमानोपमेययोः। विभक्तिः पुनरेकैव उपमानोपमेययोव मुखं पश्यामी
त्यत्रापि चंद्रपदोत्तरविभक्तेः षष्ठ्यर्थलक्षणायां सा चंद्रपदस्य मुखपदेन सहैकार्थत्वाभावान्न वि
शेष्येण सहैकार्थमित्याद्यनुशासनाप्रवृत्तेः चंद्रमिव मुखं पश्यामीत्यत्र कथं चेंद्रपदोत्तरं द्वितीये
ति चेन्न। लिंगसंख्याविभेदेषूपमानोपमेयता। विभक्तिः पुरेनैवेव उपमानोपमेययोरिति स
नुशासनेन न त्वद्वितीयोपपत्तेः। ननु निपातस्थले विलक्षणाव्युत्पत्त्यनंगीकारे घटो नास्तीत्य
त त्र कथं घटतदभावयोरन्वय इत्यत आह। घटो नास्तीत्यत्रापीति। तथा घटपदोत्तरप्रथमायाः षष्ठ्य
र्थलक्षणा इत्यदोष इति। चंद्रादिपदोत्तरप्रथमादिविभक्तेः षष्ठ्यर्थलक्षणारूपहेतोरदोषः। अ
न्वयानुपपत्तिरूपदोषो नेत्यर्थः। घटो नास्तीत्यत्र भूतले घटो नास्तीत्यत्र। घटस्याभावो नास्तीति
नार्थः। भूतले घटस्याभावोऽस्तीति नार्थः। भूतलवृत्तित्वान्वितघटाभावविशेष्यकास्तित्वैकत्व राम

प्रकारकशाब्दबोधो नेति यावत् तथा सति भूतले घटो नास्तीति वाक्यात् भूतलवृत्तित्वान्वि घटाभा
वविशेष्यकास्तित्वैकत्वप्रकारकेश्शाब्दबोधांगीकारे सति। भूतले घटौ नास्तीत्यस्या व्या
पत्तेः भूतले घ घटौ नास्तीति वाक्यस्य योग्यत्वापत्तेः अभावस्यैकत्वादिनीति। घटद्वयत्वाव
च्छिन्नाभावस्यैकत्वादित्यर्थः। घटो नास्तीत्येतदनंतरं मर्थ इति प्राक्तनमनुवर्त्तते। कथं तर्हीं
ति। तर्हि भूतलवृत्त्यभावप्रतियोगिघटोस्तीति बोधानंगीकारे भूतलवृत्तिघटाभावोस्तीति
बोधांगीकारे घटौ न स्त इत्यादि इति चेत् इति कथं घटौ न स्त इत्यादीति चेदिति योजना। आ
दिपदेन घटा न संतीत्यस्य संग्रहः। घटद्वयत्वावच्छिन्नाभावस्य घटत्वत्वावच्छिन्नाभाव
स्य चैकत्वे नद्वित्वत्रित्वयोरन्वयासंभवात् इदमुपलक्षणं। घटौ नास्तीत्यस्यापत्तिरपि बोध्या।
भावनान्वय्यभावप्रतियोगिनि संख्यान्वयादिति। भावनाकालसंख्यादिनिरूपिताख्याता र्थः। त
दन्वयी यो भावः तत्प्रतियोगिनि संख्यान्वयादित्यर्थः। घटौ न स्त इत्यत्र अस्तित्वरूपभावना

२५ न्वयी यो घटद्वयत्वावच्छिन्नाभावस्तत्प्रतियोगिनि घटद्वये आख्यातार्थद्वित्वसंख्यान्वयपरत्वात्। एवं घटा
25 न संतीत्यत्रास्तित्वरूपभावनान्वयी यो घटत्रयत्वावच्छिन्नाभावस्तत्प्रतियोगिनि घटत्रये आख्याता
र्थबहुत्वसंख्यान्वयात्। एवं घटौ नास्तीत्यस्यापत्तिरपि नास्ति। अस्तित्वरूपभावनान्वयी यो घट
द्वयत्वावच्छिन्नाभावस्तत्प्रतियोगिनि घटद्वये आख्यातार्थसंख्यानन्वयात्। आख्यातस्य भावना
न्वयितावच्छेदकसमव्याप्यसंख्याबोधकत्ववद्भावनान्वय्यभावप्रतियोगितावच्छेदकसमव्या
प्यसंख्याबोधकत्वस्याप्यंगीकारात्। कथमिति चेदिति। भावनान्वय्यभावप्रतियोगिनि संख्या
न्वयः कथमिति चेदित्यर्थः। तथैव प्रतीतेरिति। घटौ न स्त इत्यादौ भावनान्वय्यभावप्रतियोगि
विशेष्यकाख्यातार्थसंख्याप्रकारकप्रतीतेरित्यर्थः। इति ग्रहादिति। भावनान्वय्यभावप्रतियोगि
नि संख्यान्वयग्रहादित्यर्थः। परे त्विति। इह भूतले घटो नास्तीत्यादौ आख्यातं न क्रियापदसम
भिव्याहृतनञ्पदस्थल इति यावत्। भूतलास्तित्वरूपाख्यातार्थनिषेध एवेति। भूतलनिरू राम

पितविद्यमानत्वाश्रयत्वरूपाख्यातार्थनिषेध एवेत्यर्थः। घटे प्रतीयत इति। घटघटयोर्घटेषु च प्रती
यत इत्यर्थः। न पचति चैत्रश्चेति। न पचति चैत्र इत्यत्र यथा चैत्रे पाकानुकूलवर्त्तमानयत्नरूपाख्या
तार्थनिषेधः प्रतीयते तथेत्यर्थः। नातो द्विवचनानुपपत्तिरिति। अतो भूतले घटौ न स्त इत्यादौ
य भूतलास्तित्वाश्रयत्वरूपाख्यातार्थनिषेधस्य घटद्वये प्रतीतेः न द्विवचनानुपपत्तिः घटौ न
स्त इत्यादौ नाख्यातद्विवचनाद्यनुपत्तिः। निषेधस्थले भावनाप्रतियोगिकाभावान्वयिनि
आख्यातार्थसंख्यान्वयादिति भावः। नन्वेवमिति। एवं नञः सर्वत्राख्यातार्थनिषेधबो
धने का गतिः कस्याभावप्रतीतेः। नन्वत्र जातित्वाश्रयत्वाभावस्यैव प्रतीतिरित्यत आह। जाति वृत्ति ४
वृत्तित्वाभावस्यैव सत्तायाम सत्वादिति। एकार्थसमवायसंबंधेन सत्तायां जातिवृत्तित्वादिति
भावः। ननु सत्तायां जातिवृत्तित्वाभावासत्वेपि जातिसमवेतत्वाभावस्यैव सत्वात् सत्तायां
जातिसमवेतत्वाश्रयत्वाभाव एव नञा प्रत्याय्यतामित्यत आह। जातिसमवेतत्वस्य चेत्यादि।

२६ निषेद्धुं नञा तदाश्रयत्वस्याभावं बोधयितुं। यागतिर्जातिर्न सत्तावृत्तिरिति वाक्यस्येति। सत्तां न जाति
20 वृत्तिरिति वाक्याद्धर्मावच्छिन्नप्रतियोगिताकभेदप्रतीतिः तद्धर्माभावप्रतीतिरित्यर्थः। साक्षा
त्संबंधावच्छिन्नवृत्तिपरमिति साक्षात्संबंधेन जातिवृत्तिजातित्वादितद्भेदस्य सत्तायां सत्वान्नु
न्यमिति। सत्ता न जातिवृत्तिरिति वाक्यस्यायोग्यत्वे जातौ सत्ता नास्तीति वाक्यस्याप्ययोग्यत्वं सत्ता
न जातिवृत्तिरिति वाक्यस्य साक्षात्संबंधावच्छिन्नजातिवृत्तित्वावच्छिन्नप्रतियोगिताकभेदबोध
कत्वं जातौ सत्ता नास्तीति वाक्यस्य साक्षात्संबंधावच्छिन्नजातिवृत्तित्वाश्रयत्वाभावबोधकत्वमित्य य
र्थः। तथापि भूतले घटो नास्तीत्यादौ नञा आख्यातार्थनिषेधबोधनेपि कथमन्वेतीति। नामार्थ
योर्भेदेनान्वयस्याव्युत्पन्नत्वादिति भावः। नामार्थेन निपातातिरिक्तनामार्थेन। अभेदेनान्वयः
अभेदेनैवान्वयः। न नामार्थमात्रस्येति। न नामार्थमात्रस्य नामार्थमात्रेण अभेदेनैवान्वय इत्य
र्थः। मात्रपदं कृत्स्नार्थकं। प्रतियंति स्वीकुर्वंति। स्यादेतदिति। एतन्नवद्यमारां। अयं नञाभावए
वेति। अत्र प्रतीयत इति। प्राक्तनमवर्त्तते। प्रतियोग्यनुयोगिपदयोरिति। प्रतियोग्यनुयोगिबोधक राम

नु

पदयोरित्यर्थः। समानविभक्तिरिति। समानत्वं च भक्तिविभाजकप्रथमात्वाद्यन्यतमरूपेण। अन्यो
त्र न्याभावबोधे इति। अतंत्रमिति प्राक्तनमनुवर्त्तते। न पचति चैत्र इति। अत्र चैत्रः पाकानुकूल
यत्नाभाववानिति बोधः। चैत्रस्य न धनमिति। अत्र धनं चैत्रस्वत्वाभाववदिति बोधः। सप्तम्य
भावादितीति। अनुयोगिवाचकचैत्रपद धनपदोत्तरं सप्तम्यभावादित्यर्थः। तथा चानुयोगि
वाचकचैत्रादिपदोत्तरसप्तमीविभक्त्यभावेपि न पचति चैत्र इत्यादौ चैत्रादौ पाकानुकूलयत्ना
घवत्ताभावबोधनेव्यभिचारात् अनुयोगिवाचकपदोत्तरसप्तमीविभक्तेर्नात्यंताभावबोधे तंत्र
त्वमिति भावः। अत्र चेति। क्रियाविशेषणत्वेनन्तु सद्वितीयैकवचनांतं पचतीति आख्यातांतं।
समानविभक्तेरभावाच्चेति। अनुयोगिप्रतियोगिवाचकयोर्घटपटपदयोः समानविभ
क्तेरभावाच्चेत्यर्थः। अत्राहुरिति। अत्र नियुक्तनियामकप्रश्नेनाहुः। नियामकमाहुः व्युत्पत्तिरिति शेषः।
न चैवं निर्मीके नञ्यादंशविना प्रतियोग्यनुयोगिपदयोः प्रतियोग्यनुयोगिवाचकपदयोः। न त्र तादृशा

नुयोगिप्रतियोगिवाचकपदसमभिव्याहृतनञ्पदे। अन्यत्रप्रतियोग्यनुयोगिपदयोर्भेदेनान्व
यबोधेआकांक्षास्थले। अन्यबोधकत्वं अत्यंताभावबोधकत्वं। अस्तिचेति। आकांक्षेत्यग्रेतनेना
न्वयि। नञ्सत्वेनञ्पदाभावेअभेदान्वयबोधेआकांक्षेतिनामार्थयोर्भेदेनान्वयबोधस्याव्युत्प
न्नत्वादितिभावः। अतः नघटः पटइत्यत्रनञ्पदासत्वेघटपदयोरभेदान्वयबोधेआकांक्षासत्वात्।
तत्रनघटः पटइत्यत्र। अन्योन्याभावप्रत्ययः नञ्पदादन्योन्याभावप्रत्ययः। तत्रभूतलेनघटइत्यत्र
संसर्गाभावप्रत्ययइति। नञ्पदात्संसर्गाभावप्रत्ययः। नञ्पदादत्यंताभावप्रत्ययइति यावत्। व्यंज
नाचनवृत्त्यंतरमितिवाक्किलक्षणान्यतरभिन्नंनवृत्तिपदवाच्यमित्यर्थः। तेननाप्रसिद्धिप्र
तियोग्यप्रसिद्ध्योरवकाशः। यद्वाशक्तिवृत्तिवृत्तिपदवाच्यतावच्छेदकंनशक्तिलक्षणान्यतरभिन्न
वृत्तीत्यर्थः। तेनशक्तिलक्षणान्यतरभिन्नस्यवृत्तिनामकपुरुषादेर्वृत्तिपदवाच्यत्वेपिनबाधः॥
तदर्थसिद्धेरिति। व्यंग्यार्थनिश्चयादित्यर्थः। पदाद्व्यंजनाप्रयोजनसिद्धेरित्यर्थः। इदंव्यंजनायावत्सं
तखंडनेऽप्युक्तेनसम्यक्। तथाहि। अयुक्तत्वमेवजानीहि। मुख्यार्थेलक्षणाकत्वेनाभिमत

पत्किंचित्पदमुख्यार्थे इतरान्वयानुपपत्तिरिति। समभिव्याहृतपत्किंचित्पदार्थान्वयानुपपत्तिर्वादित्यर्थः। न च व्यंजनायां
सा सर्वत्रास्तीति व्यंजनायां सर्वत्र सर्वस्य व्यंजकत्वेनाभिमतस्य पदस्य मुख्यार्थे साऽइतरान्वयानुपपत्तिः। अस्तीति तिष्ठति। गावस्तो
त्यादाविति। गच्छ गच्छसि चेत्कांत पंथानः संतु ते शिवाः। ममापि जन्म तत्रैव भूयाद्यत्र गतो भवानित्यादावित्यर्थः। क्वचित्पुस्तके
मूल एव संपूर्णः श्लोकोऽस्ति। तदभावादिति। व्यंजकत्वेनाभिमतगमधातोर्मुख्यार्थे गमने गम्यमानप्रथमैकवचनां
तपुंस्त्वार्थयोः कांतस्यान्वयानुपपत्तिरूपबीजाभावेन लक्षणाया असंभवादित्यर्थः। वृत्त्यंतरमिति। गमनाभावे ग
मधातोर्व्यंजनालक्षणां वृत्त्यंतरमित्यर्थः। आक्षेपं स्वीकरणीयं। गच्छ गच्छसीत्यादौ मा गा इत्यन्वयबोधः। स च न गमधा
तोर्गमनाभावे लक्षणया नियुक्तबीजाभावात् किंतु गमधातोर्गमनाभावे व्यंजनयेति सूक्तमुदितार्थः। किमिदमिति। इदं
इतरान्वयानुपपत्तिनिष्ठं। न तावज्जनकत्वं न लक्षणाजनकत्वं। गंगातीरयोः संबंधस्य गंगातीरयोः संबंधात्मिकाया
लक्षणायाः। अनुपपत्तिज्ञानजन्यत्वात् इतरान्वयानुपपत्तिज्ञानजन्यत्वात्। नापि तद्रूपत्वमिति। नापि लक्षणाता क
पकत्वमित्यर्थः। अनुपपत्तिज्ञानमंतरेणापि इति। अनुपपत्तिज्ञानं विनापीत्यर्थः। नापि तात्पर्यग्राहकत्वमिति।
तात्पर्यग्राहकत्वं लक्षणातात्पर्यग्राहकत्वं लक्षणीयार्थतात्पर्यग्राहकत्वमिति यावत्। तेन लक्षणाविषयकतात्पर्य
ज्ञानस्य प्रकृतेऽनुपयुक्तत्वेऽपि न क्षतिः। तात्पर्यव्यापारांतरतोपीति। तात्पर्यव्याख्याप्रकरणादितोऽपीत्यर्थः। तदुदाहर

लक्षणीयार्थतात्पर्यग्रहात्लक्षणाजन्यशाब्दबोधे सहकारित्वं लक्षणाजन्यशाब्दबोधंजनकत्वं तत्र लक्षणावी
जत्वं। यष्टीः प्रवेशयेत्यत्र व्यभिचारात्। यष्टीः प्रवेशयेतिवाक्यघटकीभूतयष्टिपद्लक्षणाजन्ययष्टिधरशा
ब्दबोधे इतरान्वयानुपपत्तिज्ञानस्य हेतुतायां व्यभिचारात् यष्टेः प्रवेशनक्रियाकर्मत्वान्वयसंभवेन इतरा
न्वयानुपपत्तिज्ञानमंतरेणापि यष्टीः प्रवेशयेत्यादौ यष्टिपदलक्षणाजन्ययष्टिधरस्य शाब्दबोधोदयेन
व्यभिचारादिति भावः। शंकते। तात्पर्यविषयेति। तात्पर्यविषयान्वयानुपपत्तिः तात्पर्यविषयस्य यष्टिधरकर्म
प्रवेशनकर्मत्वान्वस्यानुपपत्तिः। अत्राप्यस्ति यष्टीः प्रवेशयेतिवाक्यघटकीभूतयष्टिपदस्य मुख्यो ऽर्थे यष्टौ
वप्यस्ति तथा च तात्पर्यविषयेतरान्वयानुपपत्तिर्लक्षणाबीजं। सा च यष्टीः प्रवेशयेत्यत्राप्यस्तीति न व्यभिचा
र इति भावः। तर्हि तात्पर्यविषयेतरान्वयानुपपत्तेर्लक्षणाबीजत्वे। तात्पर्यानुपपत्तिरेव लक्षणाबीजमस्त्विति।
तात्पर्यविषयानुपपत्तित्वापेक्षया तात्पर्यानुपपत्तित्वस्य लघुतया जनकतावच्छेदकत्वादिति भावः। सा च ता
त्पर्यानुपपत्तिश्च इहापि व्यंजनायामपि अस्तीति सूचयति। स्यादेतदिति। एतत्र वक्ष्यमाणं स्यात् भवेत्। लक्षणा
प्रयोजनमिति। लक्षणायां गंगापदजन्यतीरोपस्थितेः प्रयोजनमित्यर्थः। ननु लक्षणाजन्यशाब्दबोधप्रयोजन
मित्यर्थः। लक्ष्यप्रतीतेरेव प्रयोजनत्वादित्यग्रिमग्रंथासंगतेः। शैत्यपावनत्वादिप्रतीतिः गंगात्रिशात राम

स्पर्शपवित्रत्वादिशाब्दबोधः। न च तत्प्रतीतिर्लक्षणासाध्या। न च शैत्यपावनत्वादिशाब्दबोधो लक्षणायां गंगापद
जन्यशैत्यपावनत्वाद्युपस्थितिजन्यः। प्रयोजनाभावादिति। लक्षणायां गंगापदजन्यशैत्यपावनत्वाद्युपस्थितेः।
प्रयोजनाभावादित्यर्थः। ननु लक्षणायां गंगापदजन्यशैत्यपावनत्वाद्युपस्थितेः प्रयोजनाभावे किमनिष्टमित्य
त आह। लक्षणायाश्च प्रयोजनवत्त्वनियमादिति। लक्षणायाः पदजन्यपदार्थोपस्थितेः प्रयोजनवत्त्वनिय
पद मादित्यर्थः। तथा च लक्षणायां जन्यपदार्थोपस्थितेः प्रयोजनवत्त्वनियमभंग एवानिष्ट इति भावः। लक्ष्यप्रतीते
रेव प्रयोजनत्वादिति। अत्र लक्षणाया इति। प्राक्तनमनुवर्तते। तथा च लक्षणायां गंगापदजन्यशैत्यपावनत्वा
द्युपस्थितेः शैत्यपावनत्वादिरूपलक्ष्यार्थशाब्दबोधस्यैव प्रयोजनत्वात् तथापि लक्षणायां गंगापदजन्य
शैत्यपावनत्वाद्युपस्थिते शैत्यपावनत्वादिरूपलक्ष्यशाब्दबोधरूपप्रयोजनवत्त्वेपि प्रयोजनांतरं लक्ष्य
शाब्दबोधातिरिक्तं प्रयोजनं तत्र शैत्यपावनत्वादिलक्षणायां नास्ति न तिष्ठते ततः किमिति अतः प्रयोजनां
तराभावात् किं किमनिष्टमित्यर्थः। ननु लक्षणायाः प्रयोजनांतरवत्त्वनियमान्नाङ्गीकृत्वा नियमभंग एवानिष्टं
तत आह। लक्षणायाहीति। प्रयोजनवत्त्वे न नियम इति। लक्षणात्वं प्रयोजनवत्त्वव्याप्यमित्यर्थः। ननु लक्ष्यप्रतीत्य

२९ तिरिक्तप्रयोजनवत्त्वेनेति। नियम इति प्राक्तनेनान्वयि। तथा च लक्षणात्वं लक्ष्यप्रतीत्यतिरिक्तप्रयोजनवत्त्वा
२५ प्यमिति नियमस्तेनेत्यर्थः। गौरवादिति नियमे लक्ष्यप्रतीत्यतिरिक्तत्वप्रवेशे गौरवात्। ननु प्रामाणिकं गौरवं
ना न दोषायेत्यत आह। अप्रयोजकत्वाच्चेति। अनुकूलतर्काभावादित्यर्थः। स्यादेतदिति। एतत् वक्ष्यमाणं ना
नार्थस्थले नानार्थकसैंधवादिपदस्थले तावदिति वाक्यालंकारे अवधारणे वा। अर्थविशेषप्रत्यये लवणा
श्वादिरूपार्थविशेषनिर्णये। प्रकरणादीति। प्रकरणं वक्तृश्रोतृबुद्धिस्थता। आदिशब्दात् योग्यतादिकं लिंगं
प्रयुक्तं। नानार्थपदवाच्यान्तरव्यावृत्तो धर्मः। निर्णायकमिति। नियामकमित्यर्थः। भुंजानेनेन वक्त्रा प्रयुक्ता
त् सैंधवमानयेति वाक्यघटकीभूतसैंधवपदात् लवणबोधे प्रकरणं नियामकं। कुपितो भूभृदित्यत्र
भूभृत्पदात् राजबोधे लिंगं नियामकं। तथा च नानार्थस्थले प्रकरणादेरर्थविशेषनिर्णायकत्वे च यत्र
प्रकरणादिशून्यार्थान्तरं प्रतीयत इति। असावुदयमारूढः कांतिमान् रक्तमंडलः। राजा हरति लोकस्य हृद
यं मृदुभिः करैः इति। चंद्रोदयवर्णनप्रस्तावे अप्राकरणिको भूपतिरभ्युदयादिविशिष्टः प्रतीयत इत्य
र्थः। तत्र तादृशप्रतीतौ। नाभिधानशक्तिः। सा न प्रयोजिका सहकार्यभावात्। प्रकरणाद्यभावात्। नापि लक्षणेति राम

तत्र मूलमिति प्राक्तनेनान्वयि। अयोगात् असंभवात् मुख्यार्थबाधाद्यभावादिति भावः। तथा च व्यंजना तत्र
मूलमिति भावः। न चाभिधायाइव व्यंजनायामपि प्रकरणाद्यभावात्। न तत्र मूलत्वमिति वाच्यं। व्यंजनायाध
र्मिग्राहकमानेन प्रकरणाद्यसहकृताया एव सिद्धेरिति भावः। अत एव काव्यांतर्निविष्टस्य प्राकरणिकं किं
थो॰ ५ चिदर्थं नियताभिधाव्यापारस्याद्यसम्बन्धार्थांतरप्रत्ययहेतोः पदस्य हेयत्वं। अन्यथा नत्राभिधायाइव व्यंजना
यायाव्यस्यापि प्रकरणादिसहकारित्वे ऽसम्भ्यार्थांतरप्रत्ययासंभवात्तस्यानन्वयोनिनुदारवाचामित्यादाव
श्लीलदोषो न स्यात्। तस्मात्प्रकरणादिशून्यार्थांतरावगमने व्यंजनैव क्षमा। प्रकरणादीनामिति। प्रकरण
लिंगादीनामित्यर्थः। अननुगतया अनतिप्रसक्तानुगतधर्मानवच्छिन्नतया। सहकारित्वानुपपत्तेः। अ
र्थविशेषशाब्दबोधं प्रति नानार्थकशब्दस्य सहकारित्वानुपपत्तेः। न तथा च प्रकरणलिंगादिसाधारणानु
गतानतिप्रसक्तैकधर्माभावात् प्रकरणलिंगादीनामनुगतरूपेणाहेतुत्वेनापि प्रकरणत्वेन लिंगत्वादिप्र
त्येकरूपेणाहेतुत्वं प्रकरणं विना लिंगात् लिंगं विना प्रकरणादपि शाब्दबोधोदयेन व्यभिचारादिति भावः। ता
त्पर्यग्राहकत्वेन तात्पर्यग्रहजनकत्वेन एषां प्रकरणादीनां अनुगत इति। तथा च ता तात्पर्यग्राहकत्वेन प्रक

दर्णादीनां हेतुत्वमिति भावः। न हि प्रकरणादीनां तात्पर्यग्राहकत्वेन हेतुत्वे लाघवात् तात्पर्यग्राहकत्वापेक्षया तात्पर्य
स्य लघुत्वात्। तात्पर्यमेव तात्पर्यत्वेन तात्पर्यमेव। एवकारेण प्रकरणादिव्यवच्छेदः। हेतुः ज्ञाननिष्ठकारणया
नाया विषयतासंबंधेनानवच्छेदके। तात्पर्यपदं तात्पर्यज्ञानपरं वा तेन तात्पर्यज्ञानस्यैव हेतुत्वात् तात्प
र्यस्याहेतुत्वेपि न क्षतिः। तात्पर्यग्रह एव हेतुरिति पाठस्तु सुगमः। एवं तात्पर्यग्राहकत्वेन हेतुत्वे अन्यं
प्रति त्वेत्याद्यन्यथा सिद्धिरपि द्रष्टव्या। न च तात्पर्यं च स चेति पाठे स च तात्पर्यग्रहश्च। इहापि प्रकरणा
दिमूल्यार्थान्तरप्रतीतिस्थलेपि। अस्ति तिष्ठति। न पाच तात्पर्यग्रहरूपसहकारिसत्वात् स कार्यभावा
दिति। प्रागुक्तहेतोरसिद्धत्वात् प्रकरणादिमूल्यार्थान्तरप्रतीतावभिधैव मूलमिति भावः। स्यादेतदिति। एत
त्ववक्ष्यमाणं स्यात् भवेत्। इयं तु व्यंजनानुपदं तदेकदेशवाक्यरचनार्थ भंग्या प्रकाराश्रितेति। पदा
श्रिता व्यंजना उदाह्रियते। यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा। अनुकंप्यानुकंप्यश्च स जातः स
च जीवति। अत्र द्वितीयो मित्रशब्द आश्रवत्वे द्वितीयः शत्रुशब्दो नियंत्रितत्वे द्वितीयोनुकंप्यः शब्दः स्नेहपा
त्रत्वे संक्रमितवाच्यः। नायकस्य दृढप्रतीतिव्यंग्यमिति केचित्। अत्र द्वितीयमित्रशब्दशत्रुशब्दानुकंप्य एम

शाब्दजातत्र शाब्दजीवति शाश्चैच एते आभ्यस्तत्वनिर्यन्त्रितत्वस्नेहपात्रत्वसुजन्यत्वभङ्गुरप्यन्तावितत्वेवदर्थान्तर
संक्रमितवाच्याः विभावसस्यायावज्जीवस्थितिदत्वं व्यंग्यं एवं निर्यन्त्रणादीनामपि ज्ञायमेयं यपरे अत्र वाक्यानां
प्रत्येकविश्रान्तत्वेन नैकवाक्यता तेन पदानामेव व्यंजकता न वाक्यस्येति ध्येयं। पदैकदेशोदैश्रितव्यंजनाउ
दाहियंते। पदं द्विविधं सुबंतं तिङंतं च। एकदेशो नाम धातुरूपः प्रकृतिभागः सुप्तिङ्स्वरूपविभक्ति
भागः उपसर्गादिश्च। एवं शक्तिमदपि पदं तदेशोपि पदैकदेशः। यथा पेलवशब्दैकदेशः पेलेति भागः तत्र
धातुरूपैकदेशाश्रितां व्यंजनामुदाहरति रइकेलिहिअणिअसणकरकिसलअरुद्धणअणजुअलस्स।
रुद्दस्स तइअणअणं पव्वइपरिचुंबिअं जअइ। इति केलिहृतनिवसनकरकिसलयनिरुद्धनयनयुग
लस्य। रुद्रस्य तृतीयनयनं पार्वतीपरिचुंबितं जयति। इति संस्कृतं। रतिकेलौ हृतं निवसनं अर्था
द्गौर्याः संबंधि येन करकिसलयाभ्यां रुद्धं नयनयुगलं यस्येति बहुव्रीहिद्वयानंतरं निवसनांतयुगलांत
योः कर्मधारयसमासः। केचित्तु रतिकेलौ हृतं निवसनं यस्याः सा रतिकेलिहृतनिवसना तया करकि

सल्लमाभ्यां कुट्टं नयनयुगलं यस्येति विग्रहमाहुः। तत्र हृतनिवसनाकरकिसलयेत्यादि प्रयोगापत्तेः। अत्र रति
व्यक्तौ जिधातुरूपप्रकृतेः प्राधान्यमतः स्थगनव्यापारसाम्येप्यन्यनेत्रयोः कैराभ्यां पिधानमस्य तुल्लोको
त्तरेण कर्मणेति तदेवोत्कृष्टं धन्यजीवितमिति। रत्युत्कर्षप्रयोजकमनया व्यज्यते। अत एव जयतीत्युक्तं
न तु शोभत इत्यादि। यद्वा उत्कर्षो धात्वर्थ एवेति देव्या रत्युत्कर्षो व्यज्यते। उपसर्गरूपपदैकदेशाश्रिताव्यं
जनोदाह्रियते। परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं योनगतवान्। वि
वेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोपि तः सुखयति च तापं च कुरुते। अत्र प्रध्वंसादिति प्रशब्दः प्रकृत्ये
कदेशः प्रकर्षव्यंजकः। अपरा पदैकदेशाश्रिता व्यंजना यथा। अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठः।
परमार्थतः स हृदयं वहति पुनः कालकूटघटिततमिवि। अत्र पेलवेति पलवशब्दैकदेशो गुह्यांगव्यंजनतःव्रीडाप्रदा
यी। अन्यानि पदैकदेशाश्रितव्यंजनोदाहरणानि काव्यप्रकाशे चतुर्थोल्लासे पदैकदेशरचनावर्णेष्वपि रसा
दय इति कारिकाव्याख्यानप्रस्तावे वेदितव्यानि। ग्रंथगौरवभयादत्र न लिखितानि। वाक्याश्रिता व्यंजना यथा।
त्वामस्मि वच्मि विदुषां समवायोत्र वर्त्तते। आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्। अत्र समस्यहमर्पकमव्ययं॥ राम

अस्मत्पदस्यानुवादकोऽस्मिन्नाद्योनास्मत्पर्याय इति तदर्थः। अत्र वच्मीत्यनुपयुक्तार्थमनुपादानेऽपि वचनक्रियाप्र
तीतेः। अतः उपदेश्यत्वं लक्ष्यं तत्र वच्यर्थः संक्रमितः। एवं त्वामस्मीति पदेऽप्यनुक्तार्थे संबोध्यतयैव युष्मदर्थ
स्य वचनकर्मतावगतेः वच्म्यस्य उत्तमपुरुषेणैव अस्मदर्थस्य तत्कर्तृत्वप्रत्ययाद् अत एताभ्यां लक्ष्यमाणायोरु
पदेश्यत्वाप्तत्वयोरुक्तद्वाच्यौ संक्रमितौ तथा आत्मीयायाएवमतेः सर्वैरुक्तानादनुपयुक्तार्थेनात्मीयत्वादेन
प्रमाणापरिगृहीतत्वेन लक्ष्यमाणे तद्वाच्यं संक्रमितं आदरणीयत्वं वा। एवं ननु यस्य भिन्नाणीति पदप्रका
शादस्य को भेद इति चेन्न यत्रैकमेव वाक्यं तादृशानानापदघटितं तत्र वाक्यमधिकरणं। त्वामस्मीतिवत्
यत्र त्वेकवाक्ये एकमेव पदं तादृशं तत्र पदं यस्य भिन्नाणीतिवत्। अत्र प्रत्येकमेव वाक्यपदे समापना
दिति। रचनाश्रितां व्यंजनां प्रदर्शयितुं तदुपयुक्तं किंचिन्निरूपयन् माधुर्यव्यंग्ये टवर्गवर्जिताः कादिमा
न्ताः रेफणाकारौ च वर्णाः। तत्र कादयो भिन्नाः स्वस्ववर्गान्त्यवर्णयुताः यथा कुंज इत्यादि रेफणाकारौ तु ह्रस्व
स्वरान्तरहितौ लघ्व इति यावत्। समासाभावः एकपदप्राप्तचत्वनुरनधिकपदरूपो मध्यमसमासो वाऽसौ
कुमार्यवतापदान्तरयोगोचरताच एते व्यंजकाः। अतिप्रचुरपदारसमासेऽर्थेपतितपतिप्रत्नव्यायिमाणा
स्यादोषावधीयत इति तत्र माधुर्ये पचयः वर्णासौकुमार्येलक्ष्योऽपि पदान्तरयोगे सौकुमार्यविशेषका

३२ ामय सौकुमार्यं विन्यासरचनाया उपादानं। रचनावाव्यवधानेन पौर्वापर्यं सौकुमार्यवती रचना माधुर्यव्यंज
कवर्णासंपादकं पदानामव्यवधानेन पौर्वापर्यं रचना। भिन्नाव्यंजनाया उदाहरणं। अनंगरंगप्रतिमं तदं
32 गं भंगीभिरंगीकृतमानतांग्याः॥ कुर्वंति यूनां सहसा यथैताः स्वांतानि शांतापरचिंतितानि। रंगोन्नत्यस्था
नं आनतांग्या अंगं तथा भंगीभिरंगीकृतं यथा एतदंग्यो यूनां मनांसि शांतापरचिंतितानि कुर्वंतीत्यर्थः॥
एतानतांग्य इति कश्चित्स्खलनमहिम्नाऽङ्गानां वेपिन्त्यं विशेषो क्लिष्टि यं आशुवशीकरणे हेतुर्गमनादि
निष्ठो भंगी तदित्यनुभवैकगोचरसौंदर्यं स्तनभारेणागमीषन्नतं भंगीनां नवनवत्वेन बहु
वचनं। उद्देश्यप्रतिनिर्देश्यभावेनांगमिति निकथितं परं। अंगीकृतं स्वयमादरेण। भिन्नेत
यथांगीकरणप्रकारेणाएताः भंग्यः स्वांतानि चित्तानि विषयांतरमपरं। अत्र शृंगार
इति माधुर्यफवर्गस्य तृतीयास्तु तच्च भावर्णा आननेत्यादावनंगेत्यादौ शांतेत्यादौ
च द्वित्रिपदारब्धा मध्यमाः समासाः प्रतिम मिति तदंगमिति च पदयोः संधाने चान्यत्राव्य
स्थितकारो त्यादिना मधुररचना व्यंजयंती संगतिः। अर्थाभिन्नाव्यंजनाउदाहियते। मा
एघेणव अरणां अजकृ नमिति साहि अंजुमए। तामणकिंकरणिं जो एमेअणवासरो दाढइ। ३२
मातर्गृहोपकरणं अद्य खलु नास्तीति साधितं त्वया। तद्भण किंकरणीयं एवमेव न वा

रस्यार्थ इति संस्कृतं। प्रातरित्यादेः शायोग्यत्वं तद्वचनस्यत्वं च ध्वन्यते। उपकरणं कार्यं
नास्ति खलु नास्त्येव त्वया कथितं न तु मया ज्ञापितम्। किं करवाणीयतया ज्ञापि
तरेण किंचिद्दपि न क्रीयते एवमेव व्यासंगं विना वासरो न तिष्ठति अतो तेनु वा सरे
तेवा तु यापि न किंचिद्दावरिष्यामीति वाक्यार्थो चरकालं प्रतीयमानायां शब्दस्य न व्या
पारो विरतत्वात्। अर्थस्य च व्यापारान्तरं न संभवतीति व्यंजनासिद्धिः। अत्र विहारमा
त्रे भोगपारते यं अधिकं तु स्वाधीनमेवेति स्वैरविहारार्थिता। अथवा मातरित्या
देः शायोग्यत्वं तद्वचनस्तत्वं च ध्वन्यते। गृहे स्वैरचर्यं कर्तव्यं। त्वये न्यथा सिद्धिर्भिरसने
तत्प्रेरणे तिप्रेरणं। एवमेवेति दिनावसाने कुलांगनया लब्धैरणया पिनगं तव्याभिधि
धीयते। वाक्यार्थेन वक्तृवैशिष्ट्यात् स्वैरविहारार्थत्वं स्वैरं स्वेच्छा अन्य संनिधे दिना
वसाने संगमो भवितेति केचित्। अत्र च शब्दानां परिहरितिसह त्वेनार्थस्यैव व्यंजक
त्वं च हित्यसहत्वे शब्दधर्मो। गीकारादिति॥ मंग्यास्त्रितान्यं जनायथा। मंगि दीर्घ
समासः। पंचादिपदारब्धः समास इति यावत्। तदाश्रिते स्वपर्यः। दीर्घसमास ओजो
गुणव्यंजकः। चित्तस्य विस्ताररूपदीप्तत्वजनकमोजः। उदाहरणं। मूर्द्धामुद्धृत
कृत्ताविरलगलगलद्रक्तसंसक्तधारा धौतेश राङ्घ्रिप्रसादोपनतजयजगज्जात

मिथ्यामहिम्ना। कैलाससोल्लासनेत्यादि निकरपिशुनोत्सर्पितं पौरुषाणां दोर्दण्डे वै बाहु किमेतत्फ
३२ लमिह नगरीरक्षणाय प्रयासः। आदिशब्दाद्वर्णपरिग्रहः। कादयो मावसाना वर्णा निजां
त्यवर्णयुता माधुर्यव्यंजकाः। उदाहरणं तु। अनंगरंगप्रतिममित्यादि। आकारपदं स्व
४४ रूपपरं। इतीति पूर्वोक्तहेतोरित्यर्थः। आश्रयभेदात्तु माधुर्यादिव्यंजकहेत्वाश्रय
लक्षणयोराश्रययोः परस्परं भेदात्तेभेदः। माधुर्यादिव्यंजकहेतोर्लक्षणात्तो भेदः। तथा
च माधुर्यादिबोधकतावच्छेदिकाहेतिलक्षणातो भिद्यते लक्षणानधिकरण
पदैकदेशादिहेतित्वादित्यनुमानात्तन्माधुर्यादिबोधकतावच्छेदकहेतोर्लक्षणाभे
दसिद्धौ अर्थात्त व्यंजनासिद्धिरिति फलितार्थः। तेन नकाप्यनुपपत्तिः। असिद्धौ
रिति। माधुर्यादिबोधकतावच्छेदकहेतोः लक्षणानाधिकरणपदैकदेशादिहेतु
त्वासिद्धेरित्यर्थः। तथा च निरुक्तो हेतुः स्वरूपासिद्धः स्तोनमाधुर्यादिबोधकताव
च्छेदकहेतोर्लक्षणाभेदसिद्धिरिति भावः। ननु तर्हि ज्ञिधात्वादिरूपपदैकदेशे
विनाशो भत इत्यादितो विरति केलिहत निवसनेत्यादौ रत्युत्कर्षप्रतीत्यापत्तिरि
तिमत आह। तदेकदेशादयो हीति। तदेकदेशादयः निरुक्तपदैकदेशादयः। अ ३३
र्थविशेषतात्पर्यग्राहकाः। अर्थविशेषे रत्युत्कर्षादिरूपे। अर्थविशेषतात्पर्यग्रा

अर्थ

हकाः पदस्यार्थविशेषप्रतीतीच्छयोच्चरितत्वादिरूपतात्पर्यग्राहकाः न तु न त्वप्रतिपादकाः न तु विशे
षप्रतिपादकाः । न च निरूढप्राकृत्यादिरूपपदैकदेशस्य शक्तिमत्त्वरूपपदत्ववत्तया पदतया
शक्तिलक्षणान्यतरसंबंधेन प्रतिपादकत्वसंभवत्येवेति ननु प्रतिपादका इत्यसंगतमिति
वाच्यं । आदिपदग्राह्यरचनादिषु प्रतिपादकत्वासंभवात् । तदेकदेशआदिर्येषामित्यतद्गुण
संविज्ञानबहुव्रीह्याश्रयणाश्रयात् । अथवा एकदेशपदेनोपसर्गरूप एकदेशो ग्राह्यः
तस्य शक्तिलक्षणयोरन्यतराभावेन प्रतिपादकत्वाभावात् । तदेकदेश आदिर्येषा
मिति तद्गुणसंविज्ञानबहुव्रीह्याश्रयणेप्यदुष्टत्वात् । अथवैकदेशपदेन निरर्थकपो
लादिरूपपेलवशब्दादेकदेशो ग्राह्यः । तस्य शक्तिलक्षणयोरन्यतराभावेन प्रति
पादकत्वाभावात् तदेकदेश आदिर्येषामिति तद्गुणसंविज्ञानबहुव्रीह्याश्रयणे
प्यदुष्टत्वात् । स्यादेतदिति । एतत् वक्ष्यमाणं स्यात् भवेत् । लक्ष्ये तात्पर्यज्ञाने लक्ष्या
र्थप्रतीतीच्छयोच्चरितत्वादिरूपतात्पर्यज्ञाने लक्षणा सहकारि लक्षणाजन्यशाब्द
बोधजनके । न तु व्यंग्यार्थे तात्पर्यग्राहो नियत इति । तथा च व्यंग्यार्थे तात्पर्यज्ञानरूपस
हकार्यभावात् व्यंग्यार्थस्य न लक्षणया बोधः । न तु व्यंग्यार्थे तात्पर्यग्राहो नियतो
एवेत्यत आह । मूर्खेरचित काव्यादावित्यादि ॥ देवताराधनोद्धुरा । शिव महापुरुषविशे
षार्पितहस्तकमस्तकार्थविशेषान् अभिज्ञ बालकारनिर्मित काव्यादावित्यर्थः । अथवा

३८ वताराघनोद्धुद्धश्यक्तिकार्थानभिज्ञबालकादिनिर्मितकाव्यादावित्यर्थः। काव्यादावित्यज्ञादि
पदेन व्यंग्यार्थप्रतीतीच्छां विना पंडितरचितकाव्यस्य पूर्वरचितकाव्यस्य शुकनिर्मितकाव्यस्य
34 च संग्रहः। तस्य व्यंग्यार्थतात्पर्यादिति भावः। सुखरचितकाव्यादावित्येतदनंतरं ज्ञाते सतीति पूरणी
यं। चमत्कारादिति बोध्यादि सर्थकः। अनुचितार्थकाव्यादाविति पाठः साधुः। अनुचितार्थकाव्याद
विति। अनुचितो विवक्षितार्थतिरस्कारकोऽर्थो यस्य तदनुचितार्थकं तत्त्वत्काव्यं चेत्यनुचितार्थ
काव्यं तदादिर्यस्य तदनुचितार्थकाव्यादि तत्रेति विग्रहः। उपश्लोक्यमानतिरस्कारव्यंजकार्थव्य
जकार्थकत्वमनुचितत्वमिति नुतत्त्वं। यथा। तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरि
ष्यते च याः। प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः॥ सत्रिभिरिति। याज्ञि
कैरित्यर्थः। पशुतामुपागता इति। हता इत्यर्थः। अश्वमेधे पशव एव हन्यंते अत्र शौर्यप्रतिपाद्यपदा
तरानपेक्षमेव पशुपदं कातरजनाभिव्यंजकं। कातरता मया प्रोमीय पशुमारणं कान्नावगता ३८
मिति बहवः। वस्तुतस्तु पशुपदादेव पुष्टकार्याक्षमत्वावगमः सैव कातरता कातर्यप्रस्थापना

नुगुणां एतादृशानुचितार्थकाव्यादोतात्पर्यविषयस्यापि कत्वेस्तात्पर्यविषयस्यापि व्यंग्यस्य कातर
तारूपव्यंग्यस्य चमत्कारानुबोधात्। नहि शूरानुरक्तौ तु प्रवृत्तस्य कवेस्ते षुकातरतातात्पर्यविषय इ
ति भावः। दूषकताबीजं शास्त्रविवर्जितार्थतिरस्कारकार्थोपस्थितिः। यथा वा कुर्वे दस्वंतावस्य टर्पासि
गुणाभ्याममभिता यशो गायंते ते दिग्दिदिग्नग्नाः स्तवं विभो। वारज्योत्स्नागौरं स्फुटविकटसर्वांग
सुभगात्वापि त्वत्कीर्तिर्भ्रमति विगताच्छादनमिव॥ कुपृथ्वी विवेदत्तीति कुविदो राजा गुणाभ्याम
शौर्यादिसमूहं पश्यसि पटकरोषि। अभितः सर्वतः यशाः कीर्तिनग्नाः स्तुतिपाठका बंधादिनः गौ
रश्वेतं विकटं सुंदरं विगताच्छानंम प्रतिरोचं अत्र कुविंद इति तंतुवायपर्यायं पटं करोषीति
गुणे तु तंतुभ्यः इति। वस्त्रहीनाः यशाः इत्यत्राकारप्रश्लेषादशायः विगताच्छादनमवसनमिति तात्पर्यानुप
श्लोक्यमाना पकर्षद्योतकतयाऽनुचितार्थव्यंजयंति। एतादृशानुचितार्थकाव्ये राजानं स्तौतु प्र
वृत्तस्य कवेस्तात्पर्यविषयस्यापि तंतुवायादिनार्थस्य व्यंग्यस्याबोधादिति। अनुचितार्थकाव्या
दाविव तत्राद पदे न हि सद्धर्मतिरस्कारादिपरिग्रहः विरुद्धमतिकृत्यदाते रसाभिधाने न प्र
न प्रतीति अनेकं तो भेदमनेकधा प्रवर्तंते कुत्सितसमासांतर्हितेयहेता यथा सुधाकरकराकार।

शारदविचेष्टितः। अकार्यमित्रमेकोसौ तस्य किं वर्णयामहे। आकारस्य विशारदः पंडित इति
३५ यावत्। सुधाकरकराकारविशारदं श्रेष्ठं विचेष्टितं यस्येति समासः। अत्राकार्येषु मित्रमि
35 तितु प्रतीतिरिति। कार्यस्याभावो अकार्यं तेन मित्रमकृत्रिममित्यत्र मित्यर्थीभावसमा
सेलक्षणानुसंधानस्य विलंबेन तदपेक्षया शक्तिलक्षणयोरन्यतराभावात्कर्मधार
येण झटिति कर्मप्रतीतिः। अत्रोपश्लोकेन विरसा सावयवस्य नञो निंदार्थत्वं। यतस्तत्सा
दृश्यं तदल्पत्वं तदन्यत्वं विरोधिता। अप्राशस्त्यमभावश्च नञर्थाः षट् कीर्तिताः। एता
दृशात्कुत्सितेर्थे विवक्षेत्तात्पर्यसंभवादिति। स्वार्थे रचितकाव्यादाविति। पाठस्तु बहु
पंडितकल्पितः प्रामादिकः। शैत्यादिकमेवेति। आदिप दात्पावनपरिग्रहः। केचि
वालुकादिमत्वमिति। आदिपदात्सर्वकालपरिग्रहः। वासनायाः संस्कारविशे ३५
षो वैलक्षण्यं विलक्षणः। संस्कारः शैत्यादिविषयकः संस्कार इति यावत्। रातस्यप

रिपाकादित्यर्थः। परिपाको जातिविशेषः। इत्युक्तौ च कसममिहितत्वं वा। तथा च
शैत्यादिविषयविजातीयसंस्काराच्छैत्यादिविषयकः। स इत्युक्तसंस्काराद्धेति
तुनिष्कृष्टार्थः। नियम इति। शैत्यादिकस्यैव प्रतीतिः न केशवालुकादेः प्रतीतिरि
ति नियम इत्यर्थः। लक्षणास्थलेऽपि लक्षणाजन्यशाब्दबोधस्थलेऽपि स नियाम
क इति। वासनाविशेषपरिपाके नियामक इत्यर्थः। उक्तं यथार्थं तात्पर्यग्रहेणे
ति। तात्पर्यग्रहस्य नियामकत्वेनेत्यर्थः। ननु वासनाविशेषपरिपाकस्य लक्ष
णासहकारित्वे लक्ष्ये तात्पर्यज्ञानस्य लक्षणासहकारित्वं यत्सर्वजनानुभव
सिद्धं तस्य भंगापत्तिरित्याह। वस्तुत इति। यत्र नायं यत्र न गच्छ गच्छ
सीत्यत्र शैतेति शेषः। मागा इत्यत्रेति। इष्टसाधनी भूतगमनाभाववदित्यर्थः।।
म्रस्या वक्तुः उन्नीयते अनुमीयते। ननु यदा तात्पर्यव्याप्यवक्तासान्नं नास्ति तदा क

यमुन्नयन्नमतस्याह। संभाव्यतेवेति। संभाव्यतेवाउत्कटकोटिसंशयविषयः क्रियते वा। मागाइति। गमनाभाववत्त्वसाधनमिति। निर्णीयतेइति। शाब्दबोधविषयो क्रियतइत्यर्थः। स्यादेतदिति। एतद्वक्ष्यमाणं स्यात्। यद्येतेएवंशक्तिलक्षणेएव वृत्तीव्रत्तिपदवाच्येति। कथंतर्हीति। तर्हिकथमितियोजना। प्रजयतीत्यादावि ति। आदिपदेन प्रणमतिदुर्जयतीत्यादिपरिग्रहः। प्रकर्षबोधःजयादिनिष्ठप्रकर्षादि बोधः। प्रादेरिति। प्रादेरुपसर्गस्येत्यर्थः। प्रकर्षादाविति। आदिपदेनापकर्षादिपरि ग्रहः। शक्तिरितिनहीयनेनान्विपि। द्योतकत्वोकेरिति। द्योतकत्वनूभयसंमतमेवाप रंत्वेतावान्विशेषः। आलंकारमते द्योतकत्वेशाब्दार्थव्यंजकत्वंनैयायिकमतेद्योतक त्वेशाब्दार्थस्तात्पर्यग्राहकत्वं। नचप्रादेःशक्त्यप्रसिध्याकथंतरभावः प्रकर्षादोस घेनीयइतिवाच्यो। प्रादिःप्रकर्षादिशक्तोभाववान्द्योतकत्वात् इत्यनुमानात्पर्यन्॥

राम

न च लक्षणेति। प्रादेः प्रकर्षादावित्यनेनान्वयि। न च प्रादेर्लक्षणाप्रसिद्ध्या कथं तदभावः।
प्रकर्षादौ साधनीय इति वाच्यं। प्रादिः प्रकर्षादिलाक्षणिकत्वाभाववान् अशक्तत्वादित्यत्र तात्प
र्यात्। न च शक्तत्वे दिलाक्षणिकत्वं कुतो नास्तीति वाच्यं। लक्षणायाः शक्तिघटितत्वात्। तथ
चान्यथानुपपत्त्या देः प्रकर्षादौ शक्तिर्नैव स्वीकरणीयेति भावः॥ वादिनोऽवधानो याह्या
ऽधात इति। अन्यथा जयतीत्यादि समाधानवचनस्य प्रत्यक्षसिद्धत्वानुपपत्तेरितीवार्थस्या
ऽजयतिरत्रेति। अत्र प्रजयतीति वाक्यघटकीभूतो जयतिर्जिधातुः। तात्पर्यमाह कुः जिधा
तोः प्रकृष्टजयतीत्यध्याहरितत्वादिरूपतात्पर्यमाह कः। तत्वमेवतात्पर्यमाह कांचमेवाश
क्य एव जिधातुशक्य एव विशेषणासंगतैवकारणात्रजयेजिधातुशक्यत्वायोगव्यव
रः प्रत्याय्यते। अथवा एवकारो भिन्नक्रमे तथा च जयः शक्यः प्रकर्षे एतल्लक्ष्य इत्यर्थः
पर्यवस्यति। एवकारेण प्रकर्षनिष्ठजयपेलक्ष्यत्वाभावः प्रत्याय्यते। जयमात्रं जैत्वमात्रं य
वा वाच्यं। शक्यत्वमात्रं। ननु विशिष्टजयः। ननु प्रकर्षविशिष्टजयत्वं शाक्यतावच्छेदकं।

३७ तथा च प्रकृष्टजपेलक्षणावश्यकीतिभावः। अत्र प्राचीनसंमतिमाहातराहुरिति। यदि
37 विशेषः। शक्यादैनोनशक्यतावच्छेदकातिरिक्तरूपेधर्मेणाज्ञातेज्ञाने न भवतीति नियामि
काभवतिलक्षणेति। ननु शाब्दीरिति अथवा शक्यादन्येन रूपेणाज्ञातेव लक्षणीति शेषः।
भवतिलक्षणेति तिष्ठतिलक्षणेत्यर्थः। तथा च कार्यणा शक्यतावच्छेदकेतिरिक्तरूपप्र
कारकशाब्दबोधे न लक्षणारूपकारणानुमानमिति भावः। ननु जपो विद्याच्छ शक्यो
तः प्रकर्ष एव जिधातुलक्ष्यो लाघवात्। न तु प्रकृष्टजययोगौरवात्। नयाधिकिष्यं तु संसर्ग
मर्यादालभ्यं। एकपदार्थयोरपि भेदेन परस्परान्वयबोधांगीकारे क्षतिविरहः। न चै
वं शक्यादन्येन रूपेणाज्ञाते भवतिलक्षणेति प्राचीनगाथाविरोध इतिवाच्यं। तत्र
दृशगाथायानियुक्तिकत्वेनाश्रद्धेयत्वात्। प्रकर्षविशिष्टजयत्वस्य शक्यतावच्छेद ३७
कीभूतजयत्वानतिरिक्तत्वाच्च। विशिष्टस्यानतिरेकादिति चेत्। अत्रोच्यते। तथा
सति युगपद्वृत्तिद्वयविरोधापत्तिः। व्याख्यार्थयोर्भेदेनान्वयबोधापत्तिश्च तव मते स्यात्। ।

नच गंगायां घोषमत्स्यौ इत्यत्र युगपद्वृत्तिद्वयं स्वीकृतमेव चिंतामणिकृता। धात्वर्थस्तु भे
देन परस्परान्वयो मतान्तरस्वीक्रियते बाधकाभावादिति वाच्यं। निराकांक्षत्वस्यैव बाधकत्वात्।
तथा हि। धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति
विशेष्यतासंबंधेन प्रत्ययजन्योपस्थितेर्हेतुत्वात्। प्रकृते जिधातुशक्यार्थे जये विशेष्य
तासंबंधेन प्रत्ययजन्योपस्थितेरभावात्। जिधातुलक्ष्यार्थे प्रकर्षस्य विशेषणतया
शाब्दबोधासंभवादिति। ननु प्रादेरेव प्रकर्षद्योतकत्वेन शक्तिः कल्प्यतामिति। अत्र तेषा
माशयः। प्रजयतीत्यत्र प्रशब्दस्यैव प्रकर्षोऽर्थः। जिधातोश्च जयमात्रमर्थः। तयोर्वैशि
ष्ट्यं तु संसर्गमर्यादालभ्यं। न च नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयोऽव्युत्पन्न इति
वाच्यं। अव्ययातिरिक्तनामार्थस्यैव धात्वर्थेन समं भेदेन साक्षादन्वयस्याव्युत्पन्न
त्वात्। न च नामनि अव्ययातिरिक्तत्वविशेषणदाने गौरवमिति वाच्यं। अन्यथा न कल
ञ्जं भक्षयेदित्यादौ परनयेऽपि कलञ्जभक्षणाभावविषयककार्यमित्याद्यन्वयबोधाभा
वप्रसंगात्। आकाशं न पश्यतीत्यादौ आकाशविषयकत्वाभावस्य दर्शनेऽन्वयानुप
पत्तेश्च। तथा चोपसर्गस्य वाचकत्वमेवेति। अन्यलभ्यत्वादिति। गहणोति। जयतीत्या
दौ जयादावच्छेदशक्तिकाद्धातोरेव लक्षणया प्रकृष्टजयादिप्रतीतिसंभ
वात्। प्रशब्दस्य प्रकर्षे पृथक्शक्तौ गौरवात् मानाभावाच्च। धातुं विना केवलप्रशब्देन

प्रकर्षस्य क्वचिदप्यप्रत्यायनात्। प्रकृष्टधात्वर्थबोधे प्रशब्दानुविधानस्य तात्पर्यग्राहक
३८ तयैवोपपत्तेः। न च प्रशब्दस्यैव प्रकृष्टजयादौ लक्षणा। धातुस्तु तात्पर्यग्राहक इत्येव किं
३४ न स्यात् विनिगमकाभावादिति वाच्यं। प्रशब्दस्य क्वचिदपि शक्त्यभावेन तत्र लक्षणाया असंभ
वात्। प्रशब्दस्यैव प्रकृष्टजयादौ लक्षणायां प्रजयतीत्यादौ प्रकृत्ययोरन्वितस्वार्थबोधकत्वं
प्रत्ययानामिति व्युत्पत्तिभंगप्रसंगाच्च। न च प्रजयति प्रणमति प्रसरतीत्यादौ सर्वत्र धा
तोः प्रकृष्टक्रियायां लक्षणामपेक्ष्य प्रशब्दस्यैव सर्वत्र प्रकर्षे शक्तिकल्पनमुचितमिति र्थेष
वाच्यं। अतिरिक्तशक्तिकल्पनामपेक्ष्य बहुषु लक्षणाकल्पनाया आवश्यकत्वाच्च।
प्रशब्दस्य प्रकर्षे शक्तिमविदुषो धातोरेव लक्षणाया प्रकृष्टक्रियाप्रत्ययाद्धातोर्लक्षणा
या आवश्यकत्वाच्च। व्यतिसिद्ध्यन्तेति। व्यतिसे इति विएवीति पूर्वासंधातो लङात्मनेप
द मध्यमपुरुषैकवचनांतस्य रूपं। तथा हि। असभुवि धातुः। अयं धारद्वादिगणमध्य
स्थः परस्मैपदी। कर्तरि कर्मव्यतिहारे इति सूत्रेणात्मनेपदं। सूत्रार्थश्च। धातोः कर्त
र्यात्मनेपदं स्यात्। क्रियाया विनिमये। व्यति अस् थास् इति स्थिते। थासः सेः। टि
तो लस्य थासः सेः स्यात्। व्यति अस् से इति जाते। कर्तरि शप्। अदिप्रभृतिभ्यः शपो लु ३८
क्। श्नसोरल्लोपः। इति सूत्रेणाकारलोपः। सूत्रार्थश्च श्नस्यास्तेश्चाकारस्य लोपः स्याच्छ्नाका
र्थ

रस्य लोपः स्यात् सार्वधातुके किति। व्यतिसे इति जाते। तासस्त्योर्लोपः इति सूत्रेण। स
लोपः। सूत्रार्थश्च तासस्त्योः सस्य लोपः स्यात् सादौ प्रत्यये। व्यतिसे इति सिद्धं। लु
प्तोधातुरेव लुप्तोनुसंधीयमानः असधातुरेव अर्थं क्रियाविनिमयं प्रत्याययति बोध
यति। धातुलोपमजानतः व्यतिसे इत्यत्र धातुलोपमजानतो जनस्य। तत्रार्थप्रत्य
याभावात् व्यतिसे इत्यत्रार्थप्रत्ययाभावात्। स्यादेतदिति। एतत् वक्ष्यमाणं स्यात्॥
भवेत्। आख्यातस्य तावत् यत्न एव शक्य इति। आख्याते यत्नत्वावच्छिन्नशक्यताकमि
त्यर्थः। तेन वक्ष्यमाणाहेतोर्नवैयधिकरण्यं। आख्यातत्वं च संकेतविशेषसंबंधेना
ख्यातपदत्वं न तु जातिः। तिप्त्वादिना सांकर्यात् प्रमाणाभावाच्च। शक्ततावच्छेदकत्वं च नाख्या
तत्वं। किंतु तिप्त्वादिकमेव आख्यातत्वप्रकारेण ज्ञानदशायां तिप्त्वादिना ज्ञानात्। शाब्दबोध
मात्रस्यैव शक्तिभ्रमजन्यत्वप्रसंगात्। तिप्त्वादिना प्रकारेण ज्ञानदशायां आख्यातत्वप्रका
रेण ज्ञानात् शाब्दबोधानुदयस्य सर्वसिद्धत्वात्। यत्नत्वं च प्रवृत्तित्वं। प्रवृत्तित्वं रागजन्यताव

३९ छेदकत्वं यासिद्धोऽहं यत्नवानहं प्रवृत्तोस्मि अहं करोमीत्यनुव्यवसायसाक्षिको निवृत्ति
जीवनयोनियत्नयोः साक्षात्कारत्वात् तथानुव्यवसायविरहाच्च । चेष्टाजनकतावच्छेदको
३५ पि स एव । निवृत्तेर्द्वेषजनकविरहात्स्वसुषुप्तौ शारीरकर्मणः । ख चेष्टात्वे मानाभावात् ।
गुणविभाजकतावच्छेदकयत्नत्वस्य जातित्वे मानाभावेन प्रवृत्तित्वमपेक्ष्य तस्य गुरुत्वा
च्च । न च प्रवृत्तित्वस्य जातौ कोवच्छेदकत्वे चैत्रो निश्वसतीत्यादौ कथं निश्वासानुकूलयत्ना
नुभव इति वाच्यं । तत्र निश्वासाश्वपत्वमात्रप्रतीतेः शारीरक्रियाविशेषस्य निश्वासत्वा
वान च तथापि वृत्तित्वस्य शाक्यतावच्छेदकत्वे परमेश्वरो वेदं वक्ति परमेश्वरो वेदमु
च्चारयतीत्यादौ कथं वेदाभिन्नशब्दानुकूलयत्नत्वानुभावो वेदजनककण्ठानुकूलमि
षोते यत्नवत्त्वानुभव इति वाच्यं । कापेक्षामान्यं प्रसिपिलघुलपाद्याप्यं च मेतयाच
प्रवृत्तित्वस्यैव जनकतावच्छेदकत्वेन भगवद्यत्नेपि प्रवृत्तित्वस्य धर्मिग्राहकप्रमाण
सिद्धत्वात् । अत्र स्वशक्यप्रतिपादकताविशेषसंबंधेन कृत्यानुमत्वादिति हेतुविशेषण
पादनात् । नात्मादौ व्यभिचारः । ननु यत्नं दर्शितं दरसुतमाह । पचतीत्यस्य पाककरत्वेति विव ३९

एकत्वाच्छाब्दबोधजनकत्वमपीत्यर्थः। अथवा न लक्ष्यार्थप्रतीतीक्रियोद्यरित्वमपीत्य
र्थः। यथाकृते आख्याते शक्यसंबंधरूपाया निषेद्धुमशक्यत्वे शक्यसंबंधस्य सत्त्वात्ते
विभक्तौ लक्षणानंगीकारादिति। लक्षणासहकारेण शाब्दबोधजनकत्वप्रकारके
प्रमाविषयत्वाभावादित्यर्थः। तेन विभक्तौ शक्यसंबंधरूपलक्षणासत्त्वेपि विभक्तौ
लक्षणानंगीकारादिति मीकृचस्य नासंगतत्वापत्तिः। अन्यथा विभक्तौ लक्षणांगीका
रे व्यत्ययानुशासनवैयर्थ्यादिति। एकविभक्त्यर्थेऽपरविभक्तिविधायकमनुशास
नं व्यत्ययानुशासनं। अथवा एकविभक्तिस्थानेऽपरविभक्तिविधायकमनुशास
नं व्यत्ययानुशासनं। यथा ओदनस्य भोक्ता व्यासस्य कृतिरित्यादौ कृद्योगे कर्तृ
कर्मणोः षष्ठीविधायकं। स्मरसि कृष्ण गोकुले वत्स्याम इत्यादौ स्मृतिपर्यायधा
तुमियोगे भूतार्थे तने धातोर्लृट् विधायकं। जयति स्म युधिष्ठिर मित्यादौ स्मादि
योगे लङ्गद्यर्थे लडादिविधायकं। कर्तृकर्मणोः कृतीत्यादि सूत्रं अभिज्ञावच
ने लृट् लट् स्मे इत्यादि सूत्रं च वैयर्थ्यादित्यर्थः। तथाचानुशासनविनैव
लक्षणया षष्ठीतः कर्तृकर्मत्वयोरुपस्थितिसंभवे एवं लक्षणायैव लृट् लङ् भ्य
भूतानद्यतनकालोपस्थितिसंभवे च सूत्रप्रणयनवैयर्थ्यमिति भावः। यत्स्वय

न्स्या

नुशासने शक्तिग्राहकमिति भावः। अतः निरूढस्थले शक्तिलक्षणयोरन्यतराभा
४१ वात् इत्यन्तरेण शक्तिलक्षणाभिन्न इत्याद्येनयेतियावत्। व्यत्ययानुशासनब
लात् एकविभक्त्यर्थेऽपरविभक्तिविधायकानुशासनबलात् विभक्त्यर्थे कर्मत्वादि
रूपे अन्यस्मिन् अन्यस्मिन्नर्थे। तथा च विभक्त्यर्थेऽन्यस्य पदस्य न लक्षणेति नि
ष्कृष्टार्थः। तथा च व्यत्ययानुशासनेन शक्तिग्राहकमिति भावः। न त्वन्यत्रापि। न
नु विभक्त्यर्थभिन्नेपि। अन्यस्मिन्नलक्षणेति प्राक्तनमनुवर्त्तते। न तु विभक्त्यर्थभिन्ने
ऽन्यस्य पदस्य लक्षणा नेति तदर्थः। तथा च विभक्त्यर्थभिन्ने विभक्तेर्लक्षणायां न
किमपि बाधकमिति भावः। इहेति। रथो गच्छतीति वाक्यघटकीभूताख्यातपदे च
त्यर्थः। किंतु व्यापारे किंतु विभक्त्यर्थभिन्नव्यापारे। अत्र लक्षणेति प्राक्तनमनुव
र्त्तते। ननु व्यत्ययानुशासनबलात् विभक्तेर्न लक्षणेत्येव नियमः कल्प्यते न कु
विभक्त्यर्थेऽपि। आनुशासनिकी अनुशासनसिद्धा लक्षणा यथाह योगेषु
ष्याः कर्मत्व इति लक्षणेति प्राक्तनेनान्वयि। न च कर्मत्वे षष्ठ्या लक्षणा तां गौकारे
व्यत्ययानुशासनेन वैयर्थ्यं। व्यत्ययानुशासनं विनापि षष्ठ्या लक्षणया कर्मबो ४१
धकत्वसंभवादिति वाच्यं। यद्विभक्त्यर्थे यद्विभक्तेर्व्यत्ययानुशासनं तद्विभक्त्य

र्थेनाद्विभक्त्यतिरिक्तविभक्तेर्लक्षणा नास्तीति नियमपरतयात्यन्यानुशासनस्य सार्थ
कत्वात्। स्वस्वसंबंधस्य शक्य एव बुध्याः शक्य एव न लक्षणा न कर्मत्वे षष्ठ्या लक्षणा।
कर्मत्वप्रकारकबोधस्य षष्ठीतः कर्मत्वत्वप्रकारकबोधस्य तयाविना षष्ठ्याः कर्मत्वे न लक्षणा
याविना असंभवात् अनुत्पत्तेः। तत्प्रकारकबोधः कर्मत्वत्वप्रकारकबोधः। न भवेत्ते षष्ठीतः
नोत्पद्यत एव किंतु संबंधत्वे प्रकारक इति बोधो भवत्येवेत्यनेनापि। अनुशासनवैयर्थ्या
त् इति कृद्योगे कर्मत्वे षष्ठीविधायकानुशासनवैयर्थ्यात् संबंधत्वप्रकारकबोधस्य
शेषषष्ठ्यैवोपपत्तेरिति भावः। द्वितीयायाः कृद्योगकर्मवाचकपदोत्तरं द्वितीयायाः अनुशासन
कर्तृकर्मणोः कृतीत्याद्यनुशासनं। निष्ठादिवर्जनवैकल्यादिति। न लोकाव्ययनिष्ठाखलर्थतृना
मित्यनेन सूत्रेण निष्ठादियोगे विष्णुर्दैत्यान् हतवान् इत्यादौ कर्मवैवाचकपदे षष्ठीवर्जन
वैयर्थ्यादित्यर्थः। तत्र निष्ठादियोगे कर्मवाचकपदे तत्। निष्ठादिवर्जनं। कृत्ययोग इति। तद्यतन्वा
नीयरकव्यपूर्वकृत्याः। तेषां योगे मया मम वा सेव्यो हरिरित्यादावित्यर्थः॥ विकल्पविधानवै
यर्थ्यादिति॥ कृत्यानां कर्तरि वेति सूत्रेण कर्तृवाचकपदोत्तरं विकल्पेन षष्ठीविधानवैयर्थ्यादित्यर्थः।

४२ अत्र हेतुमाह निषेधेनैव तृतीयोपपत्तेरिति। विकल्पस्थले कोटिद्वयं। एका विधिकोटिरपरा निषे-
धकोटिरिति वक्ष्यति। प्रकृते कृत्ययोगे कर्तृवाचकपदोत्तरं पक्षे षष्ठीविधानं पक्षे षष्ठीनि-
षेधः। तत्र पक्षे षष्ठीविधानं व्यर्थं। निषेधेनैव कृत्यानां कर्तरि वेति सूत्रप्रणयनेन कृत्ययोगे
कर्तृवाचकपदोत्तरं षष्ठीनिषेधेनैव तृतीयोपपत्तेरिति तृतीयायाः साधुत्वज्ञापनादित्यर्थः।
तथा च यथा निष्ठादियोगे षष्ठीनिषेधेनैव तृतीयायाः साधुत्वज्ञापनं तथा कृत्ययोगे षष्ठीनिषेधेनैव
तृतीयायाः साधुत्वज्ञापनमिति। अत्र क्वचित्पुस्तके ऽनिषेधेनैव तृतीयोपपत्तेरिति पाठः। स च व-
याकरणानभिज्ञाधुनिकनैयायिककल्पितो न तु सोऽप्राचीनपुस्तके अनुपलभ्यमानत्वात्। अस-
गतार्थकत्वाच्च पाक्षिकषष्ठ्यर्थमिति। कृत्ययोगे मया मम वा सेव्यो हरिरित्यादौ षष्ठ्याः पक्षे प्राप्त्य-
र्थं। तृतीयेति कृत्ययोगे विकल्पविधानमित्यर्थः। एवं चैवं प्रकारकबोधजनिकाया इति षष्ठ्याः इति शे- ८२
षः। षष्ठी वचनादेवेति षष्ठी शेषे इति सूत्रादेवेत्यर्थः। निष्ठादियोगे क्तक्तवत्वादियोगे। तद्धितिकृत्प्र-
योगे विकल्पविधानमित्यर्थः। तद्योगेऽपि निष्ठादियोगेऽपि। तादृश्याः षष्ठीशेषषष्ठ्याः बहुषु गतेति स्त्री
न मनूरसारथेरित्यादिषु। ननु निरुक्तानुशासनबलात् कर्मत्वादौ षष्ठ्याः शक्तिरेव न लक्षणा
राम

तथा च विभक्तौ लक्षणाभावाद्व्यंजनानि रूक्तस्थले आवश्यकीत्यत आह। किंचेति। यदि विभक्तौ नल
क्षणा यदि विभक्तौ लक्षणाजन्यपदार्थोपस्थितिसहकारेणान्वशाब्दबोधजनकत्वात्। तर्हीति विभक्तौ
लक्षणानंगीकारादित्यर्थः। भाविनमिति। भूतत्वेतिशेषः। जानातीति। जानातीत्यत्रार्थः। कर्मत्व
कौ। शक्त्या द्वितीयाया। आक्षणोरितिशेषः। विद्यमानं घटं जानातीत्यत्र ज्ञाततारूपक्रियाजन्यफलशालि
त्वरूपकर्मत्वे द्वितीयाशक्तेस्तस्यापि कर्तुं शक्यत्वात्। भाविनं घटं जानातीत्येतावत्यर्थेतानु
पपादनं द्वितीयार्थः। द्वितीयावाच्यार्थः। तर्हीति। विषयतायां द्वितीयाशक्त्यंगीकार इत्यर्थः। कुत
इति कस्माद्धेतोरित्यर्थः। कर्मत्वप्रतीतिः क्रियाजन्यफलशालित्वरूपकर्मत्वप्रतीतिः
लक्षणां विनेति। द्वितीयायाः क्रियाजन्यफलशालित्वरूपकर्मत्वे लक्षणां विना
इत्यर्थः। द्वितीयाया विषयतायां शक्तत्वादिति भावः। तत्रापि क्रियाजन्यफलशालि
त्वरूपकर्मत्वेपि। एवं त्यक्तमिति। व्यंजने त्यर्थः। कृपशत्येवोपपत्तेरिति। लक्षणयैवो
पपत्तेरित्यर्थः। अतिरिक्तेति कल्पने गौरवादिति भावः। अनुकूलव्यापारमात्रमिति
व्यापारत्वं धर्मत्वं। मात्रपदं व्यावर्त्यार्थकं। तथा च यत्नायत्नसाधारणानुकूलधर्ममात्र

मात्वमाख्यातार्थः। अनुकूलत्वमाख्यातशक्यतावच्छेदकमिति फलितार्थः। रथो गच्छ
६२ तीत्यादाविति। रथो गच्छतीत्यादावपीत्यर्थः। मुख्य एव प्रयोग इति। तिङो मुख्य एव
४३ प्रयोग इत्यर्थः। यत्नत्वस्य। प्रवृत्तित्वस्य। तस्यैव। यत्नत्वस्यैव। नत्वस्यैव नत्वनुकूल
त्वस्य तत्र शक्यतावच्छेदकत्वमिति विभक्तिविपरिणामेनानुवर्त्तते। गुरुत्वादिति
अनुकूलत्वस्य कारणत्वादिरूपतया यत्नत्वापेक्षया गुरुत्वादित्यर्थः। तथा च
यत्नत्वमेव शक्यतावच्छेदकं नत्वनुकूलत्वमिति भावः। कथमिति। मास त इत्यने
नान्वयि। तर्हीति। यत्नत्वमात्रस्य शक्यतावच्छेदकत्व इत्यर्थः। संसर्गविधयेति। धा
त्वर्थाख्यातार्थयोः संसर्गविधयेत्यर्थः। कथमिति। इत्यादयः प्रयोगा इत्यनेनान्वयि।
तर्हीति। आख्यातस्य यत्नार्थकत्व इत्यर्थः। ननु ज्ञानानुकूलव्यापारानुकूलयत्न एव
ज्ञानानुकूलयत्नः स चास्त्येवेत्यत आह। प्रतीयते चेति। तथा च तमते ज्ञानातीत्या
दौ ज्ञानानुकूलयत्नप्रसंग इति भावः। जानातीत्यादाविति। चैत्रो जानाति इच्छति
यतते करोतीत्यादावित्यर्थः। धात्वर्थ एव ज्ञानादिरूपधात्वर्थ एव। साक्षादिति। आश्रयत्व ६२
संबंधेनान्वेति। आख्यातप्रतिपाद्यस्य जानातीत्यादावाख्यातप्रतिपाद्यस्य। कालः वर्तमान

द्विन्वे

त्वादेरूपः। संख्याएकत्वादिरूपा। ननु यन्नोपि न तु प्रदृत्तिरपि। अयोग्यत्वादिति। अनुकूलता संबंधेन ज्ञानाभाववत्वादित्यर्थः। तच्चिंत्यमिति। इदं मतमशुद्धमिति मम प्रतिभाति॥ चिंतामति कृतस्वतीवग्रेष्ठास्तोः कृथं लिखितमिति चिंतनीयमित्यर्थः। साक्षाद्भेदेनान्वयबोधस्याव्युत्पत्तेरिति। तंदुलं पचतीत्यादौ नामार्थान्वितस्य विभक्त्यर्थस्य धात्वर्थेऽन्वयबोधस्य तादृजन्यत्वादुक्तं साक्षादिति। स्तोकं पचतीत्यादौ धात्वर्थनामार्थयोरभेदसंसर्गेणान्वयबोधस्य दर्शनादुक्तं भेदेनेति। अभेदातिरिक्तसंबंधेनेत्यर्थः। अन्वयबोधस्य तादृबोधस्या अव्युत्पत्तेरिति। अस्वीकारात्। अन्यथा नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयबोधस्वीकारे। ओदनः पचतीत्यत्रेति। चैत्र ओदनः पचतीत्यत्रेत्यर्थः। ओदनपाकयोरिति। पाकओदनस्येत्यर्थः। ननु चैत्रः ओदनः पचतीत्यत्र पाकविशेषकौदनप्रकारकान्वयबोधवारणाय धात्वर्थस्य नामार्थनामार्थविशेष्यतयाऽन्वयबोधे नु किमपि बाधकमित्यत आह वस्तुतइत्यादि। जानातीत्यादावपि। चैत्रो जानातीत्यादावित्यर्थः। आख्यातार्थान्वयाभासे संख्याकालाद्यतिरिक्ताख्यातार्थान्वयबोधे। तस्याः आख्यातार्थसंख्यायाः आख्यातार्थविशेष्यगामित्वनियमात् संख्याकालाद्यतिरिक्ताख्यातार्थविशेष्यगामित्वनियमात्। आख्यातार्थविशेष्यः संख्याकालाद्यतिरिक्ताख्यातार्थः तेन विभक्त्यर्थविशेषणीभूतनामार्थस्याख्यातार्थाविशेष्यत्वेन तथाविधः चैत्रः विभक्त्यर्थविशेषणीभूतश्चैत्रः आख्यातार्थविशेष्यसंख्या

कालाद्यतिरिक्ताख्यातार्थविशेष्यत्वानवच्छेदनार्थ इति। आख्यातार्थविशेष्य इति पूर्वेणान्वयः॥
४४ द्वितीयार्थविशेषणत्वात् ओदनस्य द्वितीयार्थकर्मत्वे विशेषणत्वात् पच्यत इति। चैत्रेण ओद
नः पच्यत इत्यत्र कर्मेति आख्यातार्थविशेष्य इति लिंगादिपरिणामेनानुवर्त्तते। न कर्त्तेति अत्रा
५५ प्याख्यातार्थविशेष्य इत्यनुवर्त्तते। तृतीयार्थावरुद्धत्वादिति। तृतीयार्थकर्तृत्वे विशेषणत्वादित्य
र्थः। तथा च देवदत्तेन ओदनः पच्यत इत्यादि। कर्माख्यातस्थले ओदनादिरूपकर्माख्यातार्थवि
शेष्यं देवदत्तादिरूपकर्त्ता नाख्यातार्थविशेष्य इति पर्यवसितोर्थः। स्थीयत इत्यत्रेति। चैत्रेण
स्थीयत इत्यत्रेत्यर्थः। स्थित्यनुकूलावृत्तिः। चैत्रनिष्ठस्थित्यनुकूलावृत्तिः। आख्यातार्थे स्थीयत इ
त्यत्राख्यातार्थे। कस्यापि न विशेष्यत्वमिति। पदार्थमात्रनिष्ठविशेष्यतानिरूपितप्रकारत्वाभावः
इति हेतोरित्यर्थः। संख्याख्यातार्थे संख्याऽनन्विता न कुत्राप्यन्वेति। स्थीयत इत्यत्राख्यातार्थो
विशेष्यत्वाभावात् संख्यायाः कुत्रापि नान्वय इति पर्यवसितोर्थः। अत एव स्थीयत इत्यत्र संख्याव
अनन्वयादेव। अत्र भावप्रत्ययस्थले औत्सर्गिकद्वित्वाद्यन्वयबोधासंभवस्थल एवानुशिष्टं। अ ४४
थवा औत्सर्गिकं प्रथमोपस्थितं धात्वर्थविशेष्यकः चैत्रनिष्ठाश्रयत्वेका स्थितिरित्याकारकः
के निरूपितो संबन्धे नाश्रयत्वरूपभावना प्रकारकः स्थित्यादिरूपधात्वर्थविशेष्यकः अत्र चैत्र

राम

णस्थीयतइत्यादिभावप्रत्ययस्थले। अन्वयबोधः शाब्दबोधः। नचैवमिति। एवंभावप्रत्यय
स्थले धात्वर्थस्याख्यातार्थविशेष्यत्वे द्वित्वादीति। आदिना चित्वपरिग्रहः। द्विवचनादीति। आ
दिपदेन बहुवचनपरिग्रहः। भावप्रत्ययस्थले एकवचनस्यैव साधुत्वेन द्विवचनबहु
वचनयोरसाधुत्वादित्यर्थः। कश्चिदित्यनेनास्वरसः सूचितः। तद्बीजं तु धात्वर्थस्य भावनायां र्थे
विशेषणत्वेनैवान्वयस्य व्युत्पन्नत्वान्न विशेष्यत्वमिति। वस्तुतः चैत्रेण स्थीयत इत्यत्र
चैत्रनिष्ठा स्थितिः इति धात्वर्थविशेष्यकान्वयबोधस्यैवानुभवसिद्धत्वाद्धात्वर्थो न भाव
नाविशेष्य इति तत्त्वं। स्यादेतदिति। एतत्वक्ष्यमाणं स्यात्संभवेत्। आख्यातार्थश्चैत्रः तंडुलं
पचतीत्यादौ लडाद्याख्यातार्थः। कालः वर्तमानत्वादिरूपः कृत्यार्थे धात्वर्थे आख्यातार्थे वा। ए
कपदोपात्तत्वप्रत्यासत्त्येति। एकपदजन्योपस्थितिविषयत्वरूपप्रत्यासत्त्येत्यर्थः। तथा चाव्य
वधानेनान्वयप्रतियोग्युपस्थितिवदेकपदजन्योपस्थितिविषयत्वरूपप्रत्यासत्त्येत्यर्थः।
तथा चाव्यवधानेनान्वयप्रतियोग्युपस्थितिवदेकपदजन्यान्वयप्रतियोग्युपस्थितेरपि
आसत्तिपदार्थत्वादितिभावः। कृत्ताविन्वयेहीति। कृतौ आख्यातार्थकृतौ। आख्यातार्थ
वर्तमानत्वादिरूपकालोन्वेति। अवेहि जानीहि। तथा च चैत्रस्तंडुलं पचतीत्यत्र वर्तमाना
यस्तंडुलकर्मकपाकानुकूलयत्नस्तदाश्रयः चैत्र इत्यन्वयबोधः। धात्वर्थ इत्यपरे इति। धात्व

र्थे चैत्रस्तण्डुलं पचतीत्यादौ पचादिधात्वर्थे। आख्यातार्थः कालोन्वेतीति विशेषः इति पूर्वोक्तं। अ
64 परे केचन पण्डिता आहुरिति विशेषः। तथा च चैत्रस्तण्डुलं पचतीत्यादौ वर्त्तमानो यस्तण्डुलक
र्मपाकस्तदनुकूलकृतिमानित्यन्वयबोध इति भावः। अपरे इत्यस्य चरसबीजं तु साक्षात्कि
65 तिजनकस्य स्पन्दस्य संयोगस्य वा पाकत्वमते तस्य भविष्यत्त्वदशायां तदनुकूलकर्त्तृ
व्यापारस्य विद्यमानतादशायामपि पचतीति प्रयोगस्य सर्वसंमतस्यानुपपत्तिः।
पक्ष्यतीति प्रयोगापत्तिश्चेति। एवं कर्त्तृव्यापारस्यातीतत्वदशायां तादृशपाकस्य वर्त्त
मानत्वदशायां पचतीति प्रयोगापत्तिरपि। वस्तुतस्तु केचिदाख्यातार्थकृतौ केचिद्धात्व
ता र्थे आख्यातार्थवर्त्तमानत्वादिरूपकालोन्वेति। तथा हि। पचतीत्यादौ आख्यातार्थकृतौ व
र्त्तमानत्वाद्यन्वयो बोध्यो न पचादिधात्वर्थे। उक्तदोषात् जानातीत्यादौ धात्वर्थे वर्त्तमान
त्वाद्यन्वयो बोध्यः। ज्ञानानुकूलकृत्यसंभवादिति। न च जानातीत्यादौ ज्ञानानुकूलकृत्य
संभवे ण्याश्रयत्वरूपाख्यातार्थे वर्त्तमानत्वाद्यन्वये किं बाधकमिति वाच्यं। ज्ञाने नष्टेऽप्याश्र
यत्वस्य चैत्रे सत्त्वात् चैत्रो जानातीति प्रयोगापत्तेरिति ध्येयं। अत्र कथमन्यथा जानातीत्या
दौ ज्ञानानुकूलवर्त्तमानत्वादिप्रतीतेरिति पाठस्तु कौत्यनिकः। लिखनसंदर्भविरोधा 64
त्। स्यादेतत् इति। एतद्वक्ष्यमाणाशङ्कास्यात्संभवेत्। आख्यातविशेषवाच्ये लृट् लट् लङ्
लिङ् लुङ्। वाच्ये। भविष्यत्वं चेति। भविष्यत्तापदवाच्यत्वं चेत्यर्थः। ननु भविष्यत्ता हि न विद्य

मानप्रागभावप्रतियोगित्वात् श्वो भाविनि घटे अद्य स घटो भविष्यतीति प्रत्ययप्रसं
गात् । श्वो भाविघटप्रागभावस्याद्य वर्त्तमानत्वात् । अनेन कालविशेषेण प्रागभावस्या
धिकरणत्वेन प्रतीयते किंतु प्रतियोगिनोऽधिकरणत्वेन प्रतीयते । श्वो भावि
घटस्य चाद्यकालसंबंधाभावात् । श्वो भाविघटे अद्य घटो भविष्यतीति प्रसं
गोनेति वाच्यं श्वो भाविनि घटे परश्वः स घटो भविष्यतीत्यद्य प्रत्ययप्रसंगात् ।
श्वो भाविघटस्य परश्वः कालवृत्तित्वात् । एवं देशविशेषस्य प्रागभावेऽन्वये केपा
लनाशजन्यघटनाशस्य घटाद्यात्मकप्रागभाववत्यपि तत्र कपाले इह घटध्वंसो भा
भविष्यतीति लौकिकानामप्रतीतेः । भवन्मते तादृशस्य प्रतीत्यापत्तेः तादृशघ
टनाशप्रागभावस्य तत्र घटकपाले सत्वात् । तादृशविशेषस्य प्रागभावप्रतियोगि
न्यन्वये गृहे समुत्पद्य प्रागतो गमिष्यति चैत्रे चैत्रः प्रागतो भविष्यतीत्यापत्तेश्च ।
वर्त्तमानप्रागभावप्रतियोगिनश्चैत्रस्य प्रागनष्टत्वादिति चेन्न । यतो भविष्यती
न वर्त्तमानप्रागभावप्रतियोगित्वं किंतु वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वं ।
इहाद्य घटो भविष्यतीत्यादौ च तादृशोत्पत्तौ देशविशेषः कालविशेषश्चाधिकर
णत्वेन प्रतीयते । घटो भविष्यतीत्यादौ मुख्यार्थस्तु नाऽनुत्पत्तिः प्रत्याय्यते । लटाद्या
त्वर्थनिष्ठवर्त्तमानप्रागभावप्रतियोगित्वमात्रं प्रत्याय्यते । नक्ष्यतीत्यादौ नशोधा

८६ तुनाध्वंसः प्रत्याय्यते। लुटा वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिः प्रत्याय्यते। अत्र चानुनाऽनुत्पत्तेर्
प्रत्यायनात्। न चैवं नश्यतो रवनाशोत्पत्तौ उत्पत्स्यते वर्त्तमानप्रागभावप्रतियोगित्वमेव लृड
56 र्थो स्यादिति वाच्यं। सति तथा सति आख्यातसामान्यार्थप्रतियोगित्वेनाशस्यानन्वयापातात्। पदा
र्थैकदेशत्वात् प्रत्ययार्थोत्पत्तावेव देशविशेषकालविशेषयोरन्वयः। ध्वंसार्थनाशे कालविशे
षादेरन्वयो ध्वंसाभावे नाशके घटादौ परश्वो न ष्टयतीति व्यवहारापत्तिः। तन्नाशस्य परश्वः कालवृ
त्तित्वात्। तथा च परश्वो नंक्ष्यतीत्यादौ परश्वः कालवृत्ति वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकनाश
प्रतियोगी घट इति शाब्दबोधः। वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिः लृडर्थः। प्रतियोगित्वमा
ख्यातसामान्यार्थः। अतीतत्वं अतीतत्वपदवाच्यं। ननु अतीतत्वं न वर्त्तमानध्वंसप्रतियोगित्वं।
घटो नष्टो घटो नष्टवान् घटोऽनश्यदित्यादिव्यवहारलोपप्रसंगात्। नश्यधात्वर्थनाशे वर्त्तमा
नध्वंसप्रतियोगित्वरूपातीतत्वस्याबाधात्। न चात्रातीतकालसंबंधित्वं निष्ठादेरर्थ इति वाच्यं। ८६
चिरविनष्टेपि घटे पूर्वं घटो नष्ट इति व्यवहारप्रसंगात्। तादृशघटवर्त्तमानध्वंसप्रतियोगिकाभिन्नो
भूपूर्वैतुरूपकालवृत्तिध्वंसप्रतियोगित्वस्य सत्वादिति चेन्न। वर्त्तमानध्वंसप्रतियोग्युत्पत्तेरेव

अतीतत्वस्य शाब्दार्थत्वात् । नाष्टशोत्पन्नेष्वपि न तथा धात्वर्थे नाशेऽन्वयादुक्तव्यवहारलोपरूपबाधकाभावात् ।
तथा हि । घटो नष्ट इत्यादौ वर्त्तमानध्वंसप्रतियोग्युत्पत्तिरूपातीतत्वं निष्ठार्थः । कर्त्तरि क्तविहितस्य निष्ठा
दिरूपप्रकृतलकारस्य प्रतियोग्यर्थः । अतीतत्वं धात्वर्थे धात्वर्थो निष्ठार्थैकदेशे प्रतियोगित्वेऽभेदसंबंधेन घ
टः प्रकारतया भासते तथा च वर्त्तमाननाशप्रतियोग्युत्पत्तिकनाशप्रतियोगी घट इति शाब्दबोधः ।
घटो नश्यतीत्यत्र वर्त्तमानध्वंसप्रतियोग्युत्पत्तिरूपातीतत्वं लडर्थः । प्रतियोगित्वं कृत्विहिताख्यात
सामान्यार्थः । अतीतत्वं धात्वर्थे धात्वर्थः प्रतियोगित्वे प्रतियोगित्वं घटे प्रकारतया भासते तथा च व
र्त्तमानध्वंसप्रतियोग्युत्पत्तिकनाशप्रतियोगित्ववान् घट इति शाब्दबोधः । एवं च तिष्ठेचेत् पो
कर्त्तरि चैत्रो भावि इति प्रागभावमादाय भावि इति रूपसत्ति प्रागभावमादाय पक्ष्यतीति स्यादिति स
न्निमेणान्वेति । आघस्ति ध्वंसमादाय आघरूपत्तिध्वंसमादाय अपाक्षीदिति स्यात् । पचति चै
त्रे अपाक्षीदिति स्यात् । न स्यात् न भवेत् आघ इति प्रागभावस्यैव आघरूपत्ति प्रागभावस्यैव ।।
भविष्यत्प्रत्ययेन भविष्यत्त्वार्थकप्रत्ययेन । तत्र अभिधानादित्यन्निमेणान्वयित्वचरमकृतिध्वंसस्यै
व चरमकृत्युत्पत्तिध्वंसस्यैव अतीतत्वात् प्रत्ययेन अतीतधात्वर्थकप्रत्ययेन । अभिधानात् २८

बोधनात्। ओदनेति। ओदनपदस्य तंदुले तंदुलावयवे वा लक्षणा। विक्लित्तीति। विलक्षण
६१ रसस्पर्शादीत्यर्थः। व्यापारविशेषेति। अधःसंतापनादीत्यर्थः। तत्रेति। प्रतीतिविषयीभू
तौदननिष्ठविक्लित्तिजनकव्यापारविशेषकर्तृत्वे तच्छब्दार्थः। घटकस्तत्त्वप्रत्ययार्थः। तद
47 वयवश्च विक्लित्तौ तदनुकूलव्यापारे च तदनुकूलव्यापार इति। विक्लित्त्यनुकूलव्यापार इत्यर्थः
तथा च प्रतीतिविषयीभूतौदननिष्ठविक्लित्तिजनकव्यापारविशेषकर्तृत्वघटकविक्लि
त्तिः तादृशव्यापारविशेषकर्तृत्वघटकं तदनुकूलत्वं व्यापारश्चाकस्यार्थ इत्यर्थः। उच्यत इति।
सिद्धांत इत्यर्थः। अन्यथा वचनस्य प्रत्यक्षसिद्धत्वादुच्यत इत्यस्य वैयर्थ्यं स्यात्। तद्विति।
फलमित्यर्थः। तदनुकूलः फलानुकूलस्योपलक्षितः। फलानुकूलस्य विशिष्ट इत्य
र्थकरणे अनुकूलता च संसर्ग इत्युत्तिमग्रंथासंगतिः स्यात्। विलक्षणव्यापारः
अधःसंतापनादिरूपः धात्वर्थः पचादिधात्वर्थः। ननु अनुकूलताकस्यार्थ इत्यत आ
या ह। अनुकूलता च संसर्ग इति। संसर्गः द्वितीयार्थः फलधात्वर्थव्यापारयोः संसर्ग इत्यर्थः
तथा च द्वितीयापदात् धातुपदाच्च तद्बोधः। तच्च कैः पदैस्तदन्वयं बोधयतीत्यस्याप्रयु ६१
क्तत्वात्। तच्चेति कर्मत्वं चेत्यर्थः। क्रियेति धात्वर्थेत्यर्थः। मात्रपदं केवले फले। तथा च
कथं फलमात्रं द्वितीयार्थ इति भावः। जन्यत्वाश्रयत्वयोः संसर्गमर्यादया लाभादिति।
जन्यत्वस्य क्रियाफलयोः संसर्गमर्यादया लाभः। आश्रयत्वस्य फलौदनयोः

वै

नस्र्गमर्यादया लाभः । शक्तेर्द्वितीयायाः शक्तेः । किंहि तौ धात्वनुलभ्यमेवेति । तथा च किमर्थं फल
द्वितीयाः शक्तिरिति भावः । किंहि तौ विलक्षणव्यापारः । अधःसंतापनादिरूपः । हिरवधारणे । ननु फ
लानुकूलत्वमपीति । धात्वर्थ इति प्राक्तनेनान्वयि । गौरवादिति । फलानुकूलत्वांशेऽपि शक्तिकल्पने गौ
रवादित्यर्थः । नन्वेवमिति । एवं फलानुकूलत्वोपलक्षितविलक्षणव्यापारमात्रस्य धात्वर्थत्वे पर्याय
ता । विभिन्नशक्तेतावच्छेदकावच्छिन्नत्वे सति एकशक्यतावच्छेदकावच्छिन्नबोधकतारूपा पर्यायता ।
तथा हि । पर्यायता स्यात् गमनीति । तत्र गम्यर्थसंयोगानुकूलकर्म । त्यजत्यर्थविभागानुकूलकर्म । तयोः
फलानुकूलत्वं संयोगानुकूलत्वं विभागानुकूलत्वं चाउपलक्षणम् । त्यजिगम्योः शक्यतावच्छेदक
कोटावप्रविष्टं । कर्ममात्रे कर्ममात्रं । शक्यशक्यतावच्छेदके । तत्र तयोस्त्यजिगम्योः । इतियावत् । वा
च्यं वक्तव्यो । तथा चेति । कर्मत्वमात्रं । त्यजिगम्योः शक्यतावच्छेदकच्छेदकत्वेनेत्यर्थः । कुतो न पर्या
यता । कुतो न त्यजिगम्योर्निरूढपर्यायता । यथोक्तातिप्रसंगेति । ग्राममेगच्छतीति गत्यर्थे गम्यते त्य
जतीत्यापि निरूपातिप्रसंगे इत्यर्थः । अवच्छेदकमेवेति । धात्वर्थतावच्छेदकमेवेत्यर्थः । एवकारेण
द्वितीयार्थत्वव्यवच्छेदः । फले प्रतीयते । तथा च फले द्वितीयार्थ इति । [illegible]तं न सम्यगिति भावः । अवच्छेद
कत्वं च स्वरूपसंबंधविशेषः । आश्रयतेति । अधिकरणतेत्यर्थः । अन्वयश्चास्याः फलनिरूपक
तासंबंधेनाद्य इदं च प्राचीनमतानुसारेण । नवीनमते नु वृत्तित्वमेव द्वितीयार्थः । नन्वेवमिति । एवं
या आश्रयतो द्वितीयार्थत्वे । भूमौ पततीत्यत्रेति । अत्राश्रयतायाः सप्तम्या बोधनादिति भावः ॥
द्वितीयापत्तिरिति । आश्रयतारूपकर्मत्वे वाच्ये द्वितीयाया विहितत्वादिति भावः । समभिव्या

तद्धात्वर्थतावच्छेदकफलाश्रयताबोधकत्वव्युत्पत्तेरिति। द्वितीयायाः सममित्याद्यतद्धात्वर्थता
५८ वच्छेदकफलाश्रयताबोधकत्वव्युत्पत्तेरि[ति]। द्वितीयायाः सममित्यादितद्धात्वर्थतावच्छेदकफलाश्रयताबो
धकत्वव्युत्पत्तेरित्यर्थः। तथा च प्रकृते फले पतद्धात्वर्थतावच्छेदकत्वाभावात्। धात्वर्थतावच्छेदक
फलाश्रयत्वबोधनासंभवात्तेन द्वितीयापत्तिरिति भावः। अत एव वक्ष्यमाणादोषादेव। धूर्वमिति।
अदृष्टमितीत्यर्थः। पूर्वमते खण्डयति। न हि क्रियेत्यादिना। तथा च पूर्वमते हि फले द्वितीयार्थः।
व्यापारमात्रं धात्वर्थः। अनुकूलत्वं संसर्गः। तथा च तन्मते क्रियाजन्यफलशालित्वं कर्मत्वमि
तिलक्षणं। आशयमविज्ञायैव कते। न चेत्यादिना। ननु चैत्रो ग्रामं गच्छतीत्यत्र चैत्रस्य धा
त्वर्थतावच्छेदकग्रामसंयोगाश्रयत्वात्कर्मत्वापत्तिरित्यत आह। तद्धात्वर्थानधिकरणत्वा
दि। विशेषणात्। धात्वर्थतावच्छेदकफलशालित्वविशेषणात्। तद्धात्वर्थानधिकरणत्वे
सति तद्धात्वर्थतावच्छेदकफलशालित्वं तद्धात्वर्थकर्मत्वमितिलक्षणं निर्दुष्टं। नेतिक
र्तृत्वमित्यग्रिमेणान्वयि। चैत्रस्य तद्धात्वर्थानधिकरणत्वाभावादिति भावः। न्याय
भास्करकृन्मतमेव समञ्जसमिति विभावनीयं। तस्यैति। इत्तिग्रहसहकृतस्येत्यर्थः। ५८
निराकांक्षत्वादाविति। घटकर्मत्वमानयनं कृतिरित्यादावित्यर्थः। आदिना ऽयोग्या
नासन्नादिपरिग्रहः। अन्वयाबोधकत्वात्। अन्वयबोधाजनकत्वात्। आ
कांक्षादिकमिति। आदिना योग्यताया आसत्त्यादेश्च परिग्रहः। नेत्राकांक्षादिष्वमध्ये। यदा
द्घटपदादिरूपनामपदं। यदि न अ

म्यदादिरूप स्वोत्तरवर्त्ति विभक्तिपदेन याहृशान्वयानुभवजनकं घटादिप्रकारकाधेयतासंसर्गं
ककर्मत्वादिविशेष्यकशाब्दबोधजनकं तत्पदस्य घटपदादिरूपनामपदस्य तत्पदसमभिव्याहारः॥ अ
म्यदादिरूपविभक्तिपदाव्यवहितपूर्ववर्त्तित्वं प्रथमयत्पदेन विभक्त्युपादाने चरमयत्पदेन नामपदोपा
दाने तु नामपदाव्यवहितोत्तरवर्त्तित्वमपि बोध्यं॥ तादृशान्वयबोधे घटादिप्रकारकाधेयतासंसर्गं
ककर्मत्वादिविशेष्यकशाब्दबोधप्रयोजिकाम् आकांक्षामेव विशिष्य दर्शयति॥ भवतीह इत्यादिना॥
नामपदं॥ घटपदादिरूपनामपदं॥ उत्तरवर्त्ति विभक्तिपदेनैव सह स्वाव्यवहितोत्तरवर्त्ति द्वि
तीयैकवचनाम्यादादिरूपविभक्तिपदेन सार्धं अन्वयकबोधके घटादिप्रकारकाधेयतासंसर्ग
गिककर्मत्वादिविशेष्यकान्वयबोधजनकं॥ अतः नामपदस्य स्वोत्तरवर्त्ति विभक्तिपदसहका
रेण निरूक्तान्वयबोधजनकत्वात् तत्समभिव्याहारः॥ तयोर्नामपदविभक्तिपदयोः अव्यवधा
नेन पौर्वापर्यं तादृशान्वये निरूक्तान्वयबोधप्रयोजिका॥ अत एव निरूक्तान्वयबोधे निरूक्ता
कांक्षायाः प्रयोजकत्वादेव॥ नेति॥ अन्वयबोध इत्यनेनान्वयि॥ घटमितिवदिति॥ घटमित्यत्रेवेत्यर्थः॥

अन्वयबोधः घटप्रकारकाधेयतासंसर्गककर्मताविशेष्यकान्वयबोधः॥आकांक्षाविरहात्॥घटपदा
४९ दिरूपनामपदे विभक्तिसमभिहाररूपाकांक्षाविरहात्॥धातुपदं पच्यादिरूपधातुपदं॥आख्यातपदे
५१ नैव सहइति वादिरूपाख्यातपदे नैव साधं अन्वयविशेषबोधकमिति। पाकादिप्रकारेकानुकूलतादि
संसर्गकयत्नादिविशेष्यकान्वयबोधजनकं इति हेतोः तत्र धातुपदे आख्यातपदसमभिहारः
आख्यातपदाव्यवहितपूर्ववर्तित्वं आकांक्षेति भवतीति प्राक्तनेनान्वयि। अत एव निरुक्ताकांक्षा
यानिरुक्तान्वयबोधप्रयोजकत्वादेव। आनयेति वदिति आनयेत्यत्रैव नान्वयबोधः न निरुक्ता
न्वयबोधः इति काचकाख्यातसमभिहाराभावेनेति॥अत्र तृतीयार्थोऽभेदान्वयस्य निरा
कांक्षत्वे। तदुपस्थापकविभक्तिसहकारित्वं तदुपस्थापकविभक्तेः कर्मत्वोपस्थापकविभ
क्तिसहकारिणीयस्य तत्तदुपस्थापकविभक्तिसहकारितस्य भावत्वं तदुपस्थापकवि
भक्तेः सहकारिणीति भावः॥हंतैवमिति॥हंतेति खेदे। एवं नामपदविभक्तिपदसमभिहा ४९
ररूपाकांक्षायाः शाब्दबोधनियामकत्वे घटकर्मत्वमित्यादिवाक्येऽपि भानेसतीति शेषः॥व्यु राम
त्पत्तिरभूत् घटपदादौ व्यवहाराच्छक्तिग्रहोऽभूत्॥ततः घटः कर्मत्वमित्यादिवाक्यात् अन्व

यबोधः घटकर्मत्वयोराधाधेयभावसंबंधेन शाब्दबोधः। तथापि तादृशपुरुषे प्रमाणाभावेपि ज्ञानादनु
भववैधुर्यमेव। ज्ञानानुभवाभाव एव॥ अन्वयव्यतिरेकसिद्धकारणताविरहादिति॥ अन्वयव्यतिरेक
सिद्धाकांक्षारूपकारणताविरहादित्यर्थः॥ एतस्याप्याकांक्षायाइति॥ तत्पदस्यान्यपदसमभिहार
रूपाकांक्षायाइत्यर्थः॥ तत्स्वरूपमेवेति॥ घटःकर्मत्वमित्यादौ घटपदेऽमपदाव्यवहितपूर्ववर्त्ति
त्वम्मेवेत्यर्थः॥ अन्वयप्रबोधात् घटकर्मतयोःसंसर्गबोधात् जनितैकशाब्दबोधात् घटमानये
त्यादिवाक्यात् तादृशशाब्दबोधात् एवारणायाह॥ अपराचेति॥ आकांक्षेत्यर्थः प्रकृतान्वयबोधस्य
समानाकारोयः स्वजन्यान्वयबोधः तद्विरहस्येत्यर्थः। प्रकृतान्वयबोधेति। कार्यतानिरूपितान्वयबोधेत्यर्थः।
समानाकारेति। अन्यूनविषयकेत्यर्थः॥ स्वजन्यान्वयबोधविरहइति॥ घटमानयेत्यादिवाक्यजन्या
न्वयबोधाभाव इत्यर्थः॥ प्रकृतान्वयबोधे घटमानयेत्यादिवाक्यजन्यतद्विशेष्यकतत्प्रकारककर
कान्वयबोधे स्वरूपसती अज्ञायमानाहेतुःकारणं॥ तथा च घटमानयेति तद्वाक्यजन्यघटकर्म
कानयनानुकूलकृतिमानिति शाब्दबोधे घटमानयेति तद्वाक्यजन्यघटकर्मकानयनानुकू
लकृतिमानिति शाब्दबोधान्यूनविषयक घटमानयेति तद्वाक्यजन्यान्वयबोधाभावरूपाकां

क्षा स्वरूपसतीहेतुरितिपर्यवसितोर्थः॥ अतः प्रकृतान्वयबोधसमानाकारस्वजन्यान्वयबोध
५० विरहरूपाकांक्षापि स्वरूपसत्येवाहेतुत्वादेव घटमानयेतिपदं घटं मानयेत्यादिवाक्ये घटकीभूत
50 पदं। एकान्वयबोधे एकस्मिन् घटप्रकारकानयनानुकूलकृतिप्रकारकशाब्दबोधे अन्वयबोधोत
रं अन्योन्वयबोधः अन्वयबोधान्तरं घटकर्मकानयनानुकूलकृतिप्रकारकशाब्दबोधान्तरमिति
यात्॥ वैधुर्येति॥ विरहेत्यर्थः॥ एवं च स्वजन्यान्वयबोधविरहस्य प्रकृतान्वयबोधे हेतुत्वे च गामान
येतिवाक्यात् अन्वयबोधे गोकर्मकानयनानुकूलकृतिप्रकारकशाब्दबोधे जाते उत्पन्ने दंडेनेत्य
न्वयबोधे दंडेनेतिवाक्यसहकारेणापि नैव गामानयेतिवाक्येन दंडकरणकगोकर्मकानयनानुकू
लकृतिप्रकारकशाब्दबोधे जननीये निराकांक्षता स्यादिति स्वजन्यगोकर्मकानयनानुकूलकृ
तिप्रकारकशाब्दबोधसत्वेन स्वजन्यान्वयबोधविरहरूपाकांक्षाविरहः स्यादित्यर्थः॥ अतः गा ५०
मानयेत्यतो गोकर्मकानयनानुकूलकृतिप्रकारकशाब्दबोधे जाते दंडेनेतिवाक्यसहकारेणापि ते
नैव गामानयेतिवाक्येन दंडकरणकगोकर्मकानयनानुकूलकृतिप्रकारकशाब्दबोधे जननी दाम

येतिनिराकांक्षत्वाप्रसंगात्।उक्तेस्त्वनन्यान्वयबोधस्यविशेषणामुक्ते प्रकृतः कार्यत्वेनाभिम
तः येनगामानयेत्यन्वयबोधः इत्येवपाठः प्रामाणिकः॥कुत्रचित्पुस्तके येन दंडेन गामानयेत्यन्व
यबोध इति पाठः॥सचाप्रामाणिकोऽसंगतार्थकत्वात् येन गामानयेति बोधस्य प्रकृतत्वेन
तेन प्रकृतान्वयबोधेन समानाकार इति।अन्यूनविषयक इत्यर्थः॥अत्र च दंडेन गामानयेत्य
न्वयबोधः प्रकृतः तेन समानाकारस्तु न गामानयेत्यन्वयबोधः किंतु दंडेन गामानयेत्य
न्वयबोधस्तदभावश्च वर्त्तत एवेति भावः॥योग्यताच योग्यतापदवाच्या च।एकपदार्थस
मभिव्याहृतैकपदार्थे॥अपरपदार्थस्य समभिव्याहृतापरपदार्थस्य प्रकृतसंसर्गवत्त्व
फलीभूतान्वयविषयसंसर्गवत्त्वं तेन प्रकृतसंसर्गवत्त्वस्य योग्यतात्वेन पयसासिंच
तीति वाक्यमिति शेषः।योग्यं योग्यतावदित्यर्थः॥पयसीति जले सेकसंसर्गकरणत्वरूपसेक
संसर्गस्य तृतीयार्थकरणत्वस्य प्रकारतया संसर्गतया च मानमिति भावः॥अथवा सेकसं
सर्गस्य सेककरणत्वसंसर्गस्य सत्वात् विद्यमानत्वात्।यस्मिंश्च पयसि समुद्रमध्य

५१ ष्ठकरकारूपे वान्वये सेकसंसर्गः सेकस्य करणत्वरूपसंसर्गः सेककरणत्वसंसर्गो
51 वा नास्ति न विद्यते तस्मिन्नयसि तस्य यो बोधाऽभिप्रायेण प्रयुक्तेन योग्यं पयसा सिंच
तीति वाक्यं न योग्यं। फलीभूतान्वयबोधविषयश्च संसर्गो भेदः स च प्रकृते नास्तीति भा
वः। प्रकृतेति। फलीभूतान्वयबोधविषये त्यर्थः। समवायरूपे संसर्गवत्त्वं। आकाशे
शब्दस्य समवायरूपसंसर्गवत्त्वं। अभेदान्वयबोधेपि शब्दाकाशयोरभेदान्वयबोधे
पि। अस्य च निरुक्तयोग्यत्वस्य च॥ तद्भ्रमेणापि निरुक्तयोग्यत्वभ्रमेणापि। अपि कारेण
योग्यत्वप्रमापरिग्रहः। अन्वयबोधात् शाब्दबोधात्। ज्ञानपदं निर्णयपरमिति मन्वा
नः शंकते॥ नन्वित्यादिना। संसर्गस्यैकपदार्थनिष्ठापरपदार्थसंसर्गस्य अपूर्ववत्त्वा
त्पूर्वशाब्दबोधापूर्वं सर्वत्रैव निर्णीतत्वात्॥ कथमिति तद्ज्ञानसंभवइत्यनेनान्वये। प्रथमं क्वा ५१
प्यपूर्वं सर्वत्र तद्ज्ञानसंभवः निरुक्तयोग्यता निर्णयसंभवः॥ उच्यते। सिद्धान्त्यते॥ ज्ञानमात्रे
मिति। मात्रपदं कृत्स्नार्थकं तथा च योग्यतायाः संशयनिश्चयसाधारणं ज्ञानं हेतुरिति भावः। रा

अत्र पयसा सिंचतीति वाक्यजन्यबोधपूर्वकाले कस्यचित्‌ शाब्दबोधस्य पूर्वकाले। तन्नि
श्चयोपीत्यत्रास्ति चेत्यनुवर्त्तते। तन्निश्चयोपि निरुक्तयोग्यतानिश्चयोपि ननु कस्य शाब्दबो
धस्य पूर्वकाले तन्निश्चयः संभवतीत्यत आह। यथेत्यादि। प्रत्यक्षेणादृष्टे घटोस्तीति प्रत्यक्षे
विषयघटविषयकास्तित्वप्रकारकशाब्दबोधस्य पूर्वकाले॥ असंसर्गग्रहः। एकपदार्थे
परपदार्थसंसर्गाभावग्रहः प्रतिबंधकः॥ एकपदार्थे परपदार्थसंसर्गशाब्दबोधरूपफलानु
त्पत्तिनियतः अत इति शेषः। तदभावः॥ एकपदार्थे परपदार्थसंसर्गाभावरूपनिर्णयाभाव
रूपा स्वरूपा स्वरूपसती अज्ञायमाना हेतुः कारणं॥ न चैवमिति। एवं निरुक्तासंसर्गग्रह
स्य योग्यतात्वे जलहृदो वह्निमानित्यपि जलहृदो वह्निमानिति वाक्यमपि असंसर्गग्रहो यो २
पां जलहृदे वह्न्यसंसर्गग्रहदशायां लाघवात् एकपदार्थे परपदार्थसंसर्गाभावनिर्णयाभावं
त्वापेक्षया एकपदार्थे परपदार्थसंसर्गज्ञानत्वं कारणता शाब्दबोधकारणतावच्छेदकं। न त्वसं
सर्गाग्रह इति। पदार्थे परपदार्थसंसर्गाभावनिर्णयाभावत्वमिति॥ इदं च कारणतावच्छेदका

नलेक१

५२ र्थककारतेनान्वयि। गौरवादिति भावः॥ असंसर्गाग्रहस्य तद्धर्मावच्छिन्नविशेष्यताकतत्तद्ध
र्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारताकनिर्णयाभावस्य विशिष्टज्ञानमात्रे ए
52 वेति तद्धर्मावच्छिन्नविशेष्यताकतत्संबंधावच्छिन्नतद्धर्मावच्छिन्नप्रकारताकज्ञानसामान्ये
एवेत्यर्थः॥ कथमिति न स्यादित्यनेनान्वयि॥ अन्यथा निरुक्तविशिष्टज्ञानसामान्ये असंस
र्गाग्रहस्य हेतुत्वे चंदनं सुरभीति भ्रमे चंदनत्वावच्छिन्नविशेष्यतानिरूपितसौरभत्वा
वच्छिन्नप्रकारताशून्यत्वे चंदनत्वावच्छिन्नविशेष्यतानिरूपितसौरभाभावत्वावच्छिन्नप्रकार
ताशून्यत्वे च सति चंदनत्वावच्छिन्नविशेष्यतानिरूपितसौरभत्वावच्छिन्नप्रकारताशा
लिज्ञाने सत्यविशेषः सुरभि चंदनमिति ज्ञानं चंदनत्वावच्छिन्नविशेष्यतानिरूपितसौ
न रभत्वावच्छिन्नप्रकारताशालिज्ञानं न स्यात् भवतु असंसर्गाग्रहस्य हेतुत्वे च चंदनं सु ५२
रभीति भ्रमकाले असंसर्गाग्रहरूपकारणाभावादेव सुरभि चंदनमिति ज्ञानं न स्यादिति भावः॥
ननु निरुक्तसंसर्गाग्रहस्य विशिष्टज्ञानसामान्ये एव हेतुत्वमस्तु विशिष्टज्ञाने एवा रामः

जन्यांत विशेषणांकिमर्थमित्यत आह। तदभावेत्यादि॥ तदभावानुमितापीति। भूतलादौ घटाद्य
भावानुमितावपीत्यर्थः। चक्षुषा घटस्य चक्षुषा भूतलादौ घटादेः लौकिकसाक्षात्कार इति। दृ
श्यत इत्यग्रिमेणान्वयः॥ शंखेष्विति॥ अत्र तदभावानुमितावपीति अनुवर्त्तते। तथा च शंखे
षु पीतत्वाभावानुमितावपि शंखेषु पीतत्वभ्रमः पित्तरूपदोषजन्यः शंखेषु पीतत्वभ्रमः॥
दृश्यते अनुभूयते तथा च भूतलादौ घटाभावाद्यनुमित्यव्यवहितोत्तरकालीने भूतलादौ
घटादिलौकिकसाक्षात्कारे शंखविशेष्यकपीतत्वाभावानुमित्यव्यवहितोत्तरकालीने पित्त
रूपदोषजन्ये शंखविशेष्यकपीतत्वभ्रमे च असंसर्गाग्रहस्य हेतुत्वव्यभिचारः॥ असं
सर्गाग्रहं विनापि तादृशलौकिकप्रत्यक्षस्य तादृशालौकिकप्रत्यक्षस्य चोत्पत्तेरिति भावः॥
इति हेतोः। अजन्यान्ते विशिष्टज्ञानविशेषणमिति शेषः॥ पित्ताद्दीत्यत्रादिपदेन मंडूकवसा
द्यंजनवृत्तादयमुपराग इति भ्रमोदयात्तादृशभ्रमे असंसर्गाग्रहस्य हेतुतायां व्यभिचारः स्यादिती
अभिधेयतासंसर्गाग्रहाप्रसिद्ध्या स्वरूपसंबंधावच्छिन्नाभिधेयत्वावच्छिन्नप्रतियोगिता

कामावाप्रसिद्ध्यातद्घटाप्रसिद्धिः॥अभिधेयत्वासंसर्गीयघटाप्रसिद्धौसिद्धिः॥तदप्रसिद्ध्यातदभा
५३ वाप्रसिद्धिरितिभावः।अभिधेयत्वप्रतियोगित्वेनयोऽभावस्तन्मतः।अभिधेयत्वत्वावच्छिन्नस्वरू
53 पसंबंधावच्छिन्नप्रतियोगिताकसंबंधेनघटाद्यभावेऽभिधेयत्वावगाहीयोघटपटाद्यभावग्रहः।
सर्वोऽपिसंसर्गाग्रहइतिशेषः।तदभावस्यतादृशासंसर्गीयघटाभावस्यसोऽपिअभिधेयत्व
प्रतिप्रतियोगित्वेनाभावस्तन्मतोऽपिनप्रसिद्धइति।अभिधेयत्वत्वावच्छिन्नस्वरूपसंबंधावच्छि
न्नप्रतियोगितायाःअप्रसिद्ध्यातादृशप्रतियोगितासंबंधेनघटपटाद्यभावांशेअभिधेयप
त्वतन्मतसंभवादितिभावः।तन्नघटोऽभिधेयइतिशाब्दबोधे॥वस्तुतस्तुअभिधेयत्व
त्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगितायाःअखंडायाःअप्रसिद्धावपिखंडशः
प्रसिद्धानांअभिधेयत्वत्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगितानांसंबंधत्वसंभ प३
वात्तैःसंबंधैरभिधेयत्वस्याभावांशेतन्मतःसंभवस्यैवमतस्त्वोक्तंपदिचेति॥चैनेवमितिःएवंघटोऽभि राम
धेयइतिशाब्दबोधेयोग्यतायाःअहेतुत्वेव्यभिचारात्घटोऽभिधेयइतिशाब्दबोधेयोग्यताया

व्यभिचारात्तदापत्ताद्दशान्वयबोधे कर्मत्वादौ घटाद्यभिधेयत्वादिबोधे तदापान्वयविरहेतिकर्म
त्वादौ घटाद्यभिधेयत्वाभावेऽप्यर्थः । विशिष्टेवेति । कारणत्वमिति प्राक्तनेनान्वयि । क्व व्यभिचा
र इति । केवलान्वयिस्थलेऽन्वययोग्यताया हेतुत्वमिति भावः । आहुरित्यस्वरसबीजं तु चंदनं न
सुरभीतिबाधनिश्चयकालेऽप्याहार्यस्य चंदनं सुरभीति प्रत्यक्षस्योदयेन प्रत्यक्षस्थले प्रतिब
ध्यकतायां चाक्षुषेच्छादीनामुत्तेजकत्वस्यावश्यकत्वात्तदनुरोधेनालौकिकदोषवि
शेषाजन्यतद्विशिष्टचाक्षुषत्वादिकमेव प्रत्यक्षस्थले बाधाभावजन्यतावच्छेदकमुपगंत
व्यं न तु लौकिकसाक्षात्कारातिरिक्तदोषविशेषाजन्यतद्विशिष्टज्ञानत्वं तथा सति चंदने सुरभित्वा
भाववदिति बाधबुद्धिसत्वे सत्यां च चाक्षुषेच्छायां चाक्षुषसामग्र्याभावकाले चंदनं सुरभित्व
व्याप्यवदिति परामर्शकाले चंदनं सुरभीत्यनुमित्यापत्तिः । चाक्षुषेच्छाविरहविशिष्टभाव
निर्णयाभावस्य सत्वात् ॥ तथा च शाब्दबोधस्थले स्वतंत्रहेतुताकल्पनस्यावश्यकतया बा
धनिर्णयाभावत्वमपेक्ष्य लघीयस्या योग्यताज्ञानत्वेन हेतुता कल्प्यते ॥ इत्यादिकामिति ॥

५४ आसत्तिः पदाव्यवधानमिति । तत्पदस्याव्यवधानं तत्पदस्यासन्निधिरित्यर्थः । तत्पदाव्यवधानं च तत्पदा
धिकरणसमयध्वंसाधिकरणक्षणानुत्पत्तिकत्वे सति तत्पदाधिकरणसमयध्वंसाधिक
54 रणक्षणोत्पत्तिकत्वं । अत एव पदाव्यवधानस्यासत्तिपदार्थत्वादेव । आसन्नमिति । गिरि
पदाव्यवधानस्याग्निमत्पदे सत्वादिति भावः । अनासन्नं चेति । गिरिपदाव्यवधानस्याग्निम
त्पदेऽभावादनुक्तपदेन व्यवधानादिति भावः । चैनेवमिति ॥ एवं पदव्यवधानस्यासन्नित्वे स्था
ल्यामोदनं पचतीति स्थाल्यामोदनं पचतीत्यत्रेत्यर्थः ॥ ओदनमित्यनेनेति । ओदनपदाधि
करणक्षणेनेत्यर्थः ॥ व्यवधानादिति ॥ पचधात्वधिकरणक्षणस्य व्यवधानादित्यर्थः ॥
प्रकृतान्वयबोधाननुकूलपदव्यवधानाभावस्य विवक्षितत्वादिति तथा चाव्यवधान
वा शरीरनिविष्टेन तदधिकरणसमयध्वंसाधिकरणसमये प्रकृतान्वयबोधानुकूलप ५४
दाधिकरणत्वविशेषणं देयमिति भावः । तथा च प्रकृतान्वयबोधाननुकूलपदाधिकरण
हेतोप स्तत्पदाधिकरणसमयध्वंसाधिकरणसमय स्तध्वंसाधिकरणक्षणानुत्पत्ति रा

कत्वं सत्यं तदुल्लार्थ इति भावः। अत्र प्राचइति पाठस्तु प्रामादिकइव भाति। संदर्भविरोधात्॥
न चैवमिति। एवं पदाव्यवधानस्यासत्तित्वे तन्नहीति। क्लोकादाविस्यर्थः। पूर्वमेतेभ स्वदर्स
प्रदर्शयन्नेव मतान्तरमाह। वस्तुतस्त्वित्यादिना। आकांक्षादीति। आदिपदाद्योग्यतापरि
ग्रहः। सतात्पर्यका का गौरुक्षितिलकन्यायेनोभपत्रान्वयः। ननु व्यवहितेऽव्यवहितत्वभ्रमा
द्वान्वयबोधइत्यत आह। तद्विलंबेनाविलंबाच्चेति। अव्यवहितत्वभ्रमविलंबेनान्वयबो
धाविलंबाच्च। एतत्तज्ज्ञाने पदाव्यवधानज्ञानं। तच्चेऽव्यवहितपदतात्पर्यं वा। एतत्पदं भ्रमा
दिपदं एतत्पदाव्यवहितोत्तरं घटादिपदाव्यवहितोत्तरं अभिसंदधातु अनुसंधीयमा
नं करोतु। अभिसंधापयितुः अभिसंधानानुकूलव्यापारानुकूलव्यापारवतः। अत
एव अभिसंधापयितुः निरुक्तेच्छाया आसत्तिपदार्थत्वादेव। अभिसंधापयितुः अभि
संधानानुकूलव्यापारानुकूलव्यापारवतः। गतिः आसत्तिः। तदपि नव्यमतमपि। अ
र्थतात्पर्यज्ञानादाविति। आदिशब्देनाकांक्षायोग्यतापरिग्रहः। एतद्विलंबेन निरुक्ता

त्ति संधाप यिच्छिन्नेच्छारूपा सत्तिज्ञान विलंबेनात स्माद्व्यवहित पदतात्पर्यस्या सत्तिर्वा
५५ भावात्। वृत्त्या शक्तिलक्षणान्यतर संबंधेन। सा च वृत्त्या पदजन्यपदार्थोपस्थितिर्वा। स्व
55 रूपसती अज्ञायमाना पदार्थानुपस्थितौ वृत्त्या पदजन्य पदार्थानुपस्थितौ अन्वबोधः
शाब्दबोधः वृत्त्या पदजन्येति। व्यर्थमिति। तथा च पदार्थोपस्थितिमात्रं वा आसत्ति
रिति भावः। घटपदादीत्यादिदूषणात् नयत्रापि बोध्यं। घटकर्मकत्वानयनकृत्युप
स्थितीनामिति। घटोपस्थितिकर्मत्वोपस्थित्यानयनोपस्थितिकृत्युपस्थितीनामि
त्यर्थः। कृतद्वंद्वानां घ यदि व्यस्तानामुपस्थितिपदेन षष्ठीतत्पुरुषविधानात् नयुग
पत्संभवः। न एकक्षणावृत्तित्वसंभवः। तथा च कथं पदजन्यपदार्थोपस्थितीनां शाब्द
बोधं प्रतिकारणत्वमिति भावः। आशुविनाशिनां तत्तद्वृत्तिक्षणध्वंसप्रतियोगिनां क्र
मिकाणां क्रमोत्पन्नानां मेलकाभावात् मिलनाभावात् क्रमिकाणामपि स्थिराणां मिलनं सं ५५
भवतीत्यत उक्तं आशुविनाशिनामिति॥ आशुविनाशिनामपि सहोत्पन्नानां मिलनं संभवती
त्यत उक्तं क्रमिकाणामिति॥ आशुविनाशिनोः क्रमिकयोर्द्वयोर्मिलनं संभवतीत्यत उक्तं राम

बहुवचनं। युगपत्तावत्पदस्मारणात्। एकपदानेकपदस्मरणात् युगपत्तावद्वेदार्थोपस्थि-
तौ एकपदानेकपदार्थोपस्थितौ। अत एव वक्ष्यमाणादोषादेव। अपवा अत एव आसुविना-
शिनां क्रमिकाणां मेलकाभावादेव। अव्यवधानेनेत्यत्र तृतीयार्थो विशिष्यो तथा च पदज-
न्यपदार्थोपस्थित्यव्यवधाने विशिष्टपदजन्यपदार्थोपस्थितिरासत्तिरित्यर्थः। पर्य-
वसितः। तृतीयान्तवैयर्थ्यादिति। अव्यवधानेनेत्यस्य व्यर्थत्वादित्यर्थः। व्यवहितोपस्थितौ
द्वितीयक्षणाव्यवहिततृतीयक्षणोत्पन्नोपस्थितौ सत्यामिति शेषः। एकस्या उपस्थितेः
प्रथमक्षणोत्पन्नोपस्थितेः नाशात्तृतीयक्षणोत्पन्नस्थितिक्षणे विनाशादित्यर्थः। तथा
च व्यवहितोपस्थितीनां तीव्यवहितोपस्थित्योः मिलनासंभवान्न तत्र शाब्दबोधापादन-
मिति भावः। इदं सैंधवादिपदं तस्मिन्नर्थे कर्मत्वादिरूपेऽर्थे अश्वलवणादेः अन्वयसंबंध-
प्रत्यापयितुः बोधयितुः अभिसंधापयितृमात्रमिति। अभिसंधानानुकूलव्यापारानुकूल-
व्यापारवान्। मौनिश्लोकव्याख्येति॥ तत्र कवक्तुरभावादिति भावः। गतिः तात्पर्यं तथा च म-

५६ गवद्दिष्टये वेदस्य ज्ञाने दंतत्तायेतिभावः। तस्य च तात्पर्यस्य च निश्चयः संशयभिन्नं ज्ञानं हेतुः का
56 रणं॥ अस्य तात्पर्यस्य संशयएककधर्मिताकतात्पर्यतदभावोभयकोटिकज्ञाने व्यतिरेक
निश्चये तात्पर्याभावनिश्चये अन्वयाबोधात् शाब्दबोधाभावात् यद्व्यतिरेकसंशयनिश्चयौ
यत्र प्रतिबंधकौ तन्निश्चयस्तद्धेतुरिति नियमादिति भावः। अस्य संशयइत्यादिना व्यति
रेकसहचारोपिदर्शितः। अन्वयसहचारमपिदर्शयति। तद्भ्रमेत्यादिना॥ तद्भ्रमे च तात्पर्य
भ्रमे च अन्वयबोधात् शाब्दबोधोदयात्॥ सोपमिति। सः इति यह सहवर्तः अपभ्रंशको
सा ज्ञानादिसहकारिकः शाब्दः। वराइत्यर्थः। द्वैविध्यमेव दर्शयति। विधिरर्थवादश्चेति॥
तत्र विध्यर्थवादयोर्मध्ये। विध्यभिधायकः विधिप्रत्यायकः प्रत्ययः लिङादिः विधिर्वि
धिमेरणान्वेति। विध्यभिधायकप्रत्ययघटितवाक्यएव विधिर्विव्यवहारादाह। तद्घटितवा ५६
क्यं वेति। विधिरिति। विधिशब्दप्रतिपाद्यमित्यर्थः। तद्घटितं विध्यभिधायकप्रत्ययघटितं। ननु वि
ध्यभिधायकइत्यत्र विध्यभिधेयः क इत्याशंकायामाह। विध्यभिधेयश्चेति। विध्यभिधायक राम

इत्यत्र विधित्वाद्यभिधेयत्वे विधिशब्दप्रतिपाद्यत्वेति यावत्। यद्वाननु विध्यभिधायकप्रत्यये
विधिरित्यत्र प्रत्ययात्मकविध्यभिधेयविधिकः इत्यत आह। विध्यभिधेयत्वेति। अत्र विधि
रनुवर्त्तते। न चाचविध्यभिधेयत्वेऽस्य विध्यभिधेयो विधित्वेत्यर्थः। तेन न पुल्लिंगनिर्दे
शानुपपत्तिः। अभिधेयविधित्वेति पाठस्तु सुगम एव। ननु कार्यत्वं प्रागभावप्रतियोगि
त्वं तच्च न लिङाद्यभिवाच्यं। मानाभावादित्यत आह। तच्चेति। कार्यत्वं चेत्यर्थः। अत्र कृतिसाध्यत्वस्य
विध्यर्थत्वे प्रवर्त्तकज्ञानं इष्टसाधनत्वादिज्ञानं प्रवृत्तिजनिकामिति। कृतिसाध्यत्वप्रका
रिकामिच्छामित्यर्थः। अलं समर्थः। अतः विधेः प्रवृत्तिजनकेच्छाजननपित्वा प्रवृत्तिजनना
योग्यत्वात्। सूते जनयन पति। तज्जननीच कृतिसाध्यत्वप्रकारिकेच्छाजननं चा। ननु कृ
तिसाध्यत्वप्रकारिकेच्छां प्रति कृतिसाध्यत्वप्रकारकबुद्धेर्हेतुत्वे किं मानमित्यत आह। कृत्य
साध्यत्व इत्यादिना। तदनुत्पत्तेः कृतिसाध्यत्वप्रकारकेच्छानुत्पत्तेः। ननु कृतिसाध्यताज्ञानकाले तादृ
छापत्ति वारणाय कृत्यसाध्यताज्ञानाभावस्यैव कारणत्वमस्तु ननु कृतिसाध्यताज्ञानस्येत्यत आह।

नत्वित्यादिना। गौरवात्कृतिसाध्यत्वज्ञानस्यापेक्षयाकृत्यसाध्यत्वज्ञानाभावत्वस्य गुरुत्वात्॥
५१ ननु कृत्यसाध्यताज्ञानकाले चिकीर्षावारणाय लाघवात्कृत्यसाध्यताज्ञानाभावत्वेन हेतुत्वमा
57 स्थीयते न तु कृतिसाध्यतानिश्चयत्वेन तादृशनिश्चयत्वस्य कृतिसाध्यत्वभावप्रकारक
त्वे सति कृतिसाध्यत्वप्रकारकज्ञानत्वरूपस्य कृत्यसाध्यताज्ञानाभावापेक्षया गुरुत्वादित्य
है त आह। सर्वस्येत्यादि। यद्वा ननु कृत्यसाध्यताज्ञानाभावस्य चिकीर्षापूर्वकालवृत्तित्वमुप
पत्वादिसिद्धमनन्यथासिद्धत्वमात्रं कल्प्यते। कृतिसाध्यतानिश्चयस्य तु चिकीर्षाव्यवहि
तपूर्वकालवृत्तित्वमनन्यथासिद्धत्वं चोभयं कल्प्यते मे लाघवात्कृत्यसाध्यताज्ञानाभावा
स्य हेतुरित्यत आह। सर्वस्येत्यादि। सर्वदा कृत्यसाध्यताज्ञानशून्यकाले सर्वदा चिकीर्षास
त्त्वापत्तेरिति कृतिसाध्यत्वप्रकारकारकेच्छोत्स्यप्रापत्तेरित्यर्थः। यद्यपि सन्प्रत्ययान्तकृधा ५१
तुनिष्पन्ने चिकीर्षापदस्यार्थः। कृतीच्छेव। ननु कृतिसाध्यत्वप्रकारिकाक्रियाविषयतापेक्षा
सनोधात्वर्थगोचरेच्छावाचित्वात्तथापि कृतिसाध्यत्वप्रकारकक्रियाविशेष्यकेच्छात्वे राम

धापाचिकीर्षाशब्दोऽखंड एवेति भावः। सर्वदा तत्सत्वात्। कृत्यसाध्यताज्ञानशून्यकाले सर्व
दा कृत्यसाध्यताज्ञानाभावसत्वात्। अतः कृतिसाध्यत्वप्रकारकज्ञानस्य चिकीर्षाहेतुत्वात्।
कृतिसाध्यत्वमेवेति एवकारेणेष्टसाधनत्वादिव्युदासः। नन्वेवमिति। एवं कृतिसाध्यत्वमा
त्रस्य विधेयार्थत्वे। मंडलीति मंडलाकारेणाभ्रमणमित्यर्थः। बलवदनिष्टाननुबंधिकृतिसा
ध्यताज्ञानमिति बलवदनिष्टाननुबंधित्वविशिष्टकृतिसाध्यज्ञानमित्यर्थः। बंध्यंत साध्या
तयोः कर्मधारयसमासानंतरं तल्प्रत्ययविधानात् कर्मधारयोत्तरभावप्रत्ययस्य सामा
नाधिकरण्यसंबंधेनैकपदार्थतावच्छेदकविशिष्टापरपदार्थतावच्छेदकबोधकत्वात्। इ
ष्टमपि बलवदेवेनिष्टाननुबंधिकृतिसाध्यताज्ञानस्य प्रवर्तकत्वेपि। तत्र मंबुलीकरणा
प्रवृत्तिजनकज्ञानस्य बलवदनिष्टानवंधिकृतिसाध्यताज्ञानस्य सत्वात् विद्यमानत्वात्॥ अत्र प्रा
भाकरमतदूषणा प्राभाकरमतानुवर्तिनः प्राभाकरमतानुयायिनः। नित्ये संध्यावंदनादौ शौ
चादौ स्यादिनो हि जनत्वादिपरिग्रहः। तेन मूत्रादौ नव्याभिधाने शौचादिमत्वे प्रतिसंधानजन्य

शौचादिमद्द्विजातित्वरूपलिंगज्ञानजन्यं कार्यताज्ञानं कृतिसाध्यतायामनुमित्यात्मकं ज्ञानं प्र
५८ वर्त्तकं प्रवृत्तिजनकं । अनुमानप्रकारस्तु अहमेतत्संध्यायां कृतिसाध्यसंध्यावंदनः एत
58 त्संध्यायां शौचादिमत् द्विजातित्वादित्यादि यो यत्संध्याकालीनशौचादिमान् द्विजातिः स
त्कालीनकृतिसाध्यसंध्यावंदनकः इ प्रोत्तितेः । न च एतत् संध्यावंदनस्यापि तच्च प्रवृत्तिः स्या
दिति वाच्यं । स्वविषयसिद्धाचिकीर्षाविरहेणात्र प्रवृत्तेरिति । यद्यप्येतद् ज्ञानं न प्रवर्त्तकं त
तो मच्छौचं प्रकारकत्वात् तथापि संध्यावंदनमिदानीं मत्कृतिसाध्यं इदानीं शौचादिम
तो ममेदानीं प्रवृत्तिप्रतिबंधकमन्यत्वे सति मत्कृतिसाध्यत्वादित्युत्तरभाव्यमनुमानांतरं
द्रष्टव्यं । अन्यत्र काम्ये इष्टसाधनताज्ञानजन्यमिति । कार्यताज्ञानमित्यपि मेरुणान्वपि तथा
चेष्टसाधनतालिंगकं कृतिसाध्यतायामनुमित्यात्मकं ज्ञानं काम्यगोचरप्रवृत्तिं प्रतिकारण ५९
मित्यर्थः । अनुमानप्रकारस्तु यागो मत्कृतिसाध्यः मत्कृतिं विनाऽसत्वे सति मदिष्टसाध
नत्वादित्यादिः । लाघवाद्दोहाइष्टसाधनताज्ञानकालीनं चेति । स्वसामानाधिकरण्यकालिक रामः

विशेषणतो न यसंबंधेनेष्टसाधनताज्ञानविशिष्टमित्यर्थः। तेन चैत्रीयेष्टसाधनताज्ञानका
लीनमैत्रीयकृतिसाध्यताज्ञानमादाय मैत्रस्य न प्रसत्त्या पादानमिति। प्रवृत्तिसामान्ये नित्यानि
त्यसाधारणप्रवृत्तित्वावच्छिन्ने कृतिसाध्यताज्ञानसामान्यमिति हेतुरिति प्राक्तनेनान्वयि। न चै
वमिति। एवं नित्यगोचरप्रवृत्तिं प्रति शौचादिमत्वप्रतिसंधानजन्यकार्यताज्ञानस्य काम्यगोचर
प्रवृत्तिं प्रति इष्टसाधनताज्ञानकालीनकार्यताज्ञानस्य प्रवृत्तिसामान्यं प्रति च कृतिसाध्यता
ज्ञानस्य च हेतुत्वे लाघवात् कार्यकारणभावत्रयकल्पनायसैपैपालाघवात् प्रवृत्तिसामान्ये
नित्यानित्यसाधारणप्रवृत्तिसामान्ये ऽनित्ये संध्यावंदनादौ तदभावात् इष्टसाधनताभावा
त्तत्र च नित्ये विषयबाधादिष्टसाधनताविषयककृतिसाध्यताज्ञानं न संभवतीति भावः।
ननु वक्ष्यमाणायुक्त्या नित्येपीष्टसाधनत्वमस्त्येवेत्यत आह। साध्यत्वसाधनत्वयोरित्या
दि। साध्यत्वसाधनत्वयोरिति कृतिसाध्यत्वकालांतरभाव्योदनादिसाधनत्वयोरित्यर्थः।
कालांतरभावित्वं स्वध्वंसाधिकरणक्षणभावित्वं विरोधेनैकक्षणावच्छेदेनैकत्रावृत्तित्वेने
कस्य एकपुरुषस्य। एकस्मिन्यागादावितिशेषः भानासंभवात् एकक्षणावच्छेदेन निश्च

पासंभावात्॥ अनयोः साध्यत्वकालांतरभाव्योदनादिसाधनत्वयोः विरोधः एकस्मिन्नवच्छेदेनैकत्र
५८ वृत्तित्वं। इष्टं वक्ष्यमाणप्रकारेण। साधनत्वे हीति। कालांतरभाव्योदनादिसाधनत्वे हीत्यर्थः॥ स्थि
रधर्मः स्वस्याधीनसमयसंबंधाभावविशिष्टधर्मः। तथा च स्वस्याधीनसमयसंबंधाभावविशि
59 ष्टत्वमेव सिद्धमिति भावः। असिद्धत्वा। स्यादिति। उत्पत्तिक्षणकालीनात्कारणादित्यर्थः। कार्यानुत्प
त्तेरिति। कालांतरभाविकार्यानुत्पत्तेरित्यर्थः। यद्यप्युत्पत्तिक्षणकालीनात्कालांतरभाविकार्यानु
रा त्पादेऽपि कारणतावच्छेदकधर्मवत्त्वरूपं कारणत्वमुत्पत्तिक्षणेऽप्यक्षुण्णमेव तथापि स्वरूपयोग्यतादृशि
ष्टेन फलं जनयिष्यतीति ज्ञाने प्रवृत्त्यनुत्पादात् फलोपधायकौदनादिसाधनत्वस्यैव संज्ञाय
साधकस्य ज्ञानहेतुर्वाच्यः॥ तादृशं च कालांतरभाव्योदनादिसाधनत्वमुत्पत्तिक्षणे न संभवती
ति भावः। केचित्तु गुरुनये फलसमयवर्त्तिन एव कारणतया फलसमयवृत्तित्वस्यापि कारणता ५८
घटकत्वादुत्पत्तिक्षणे न तत्संभवतीत्यभिप्रायात् इष्टं च साध्यत्वसाधनत्वयोर्विरोधइ
त्यत्र साधनत्वपदं सामान्यतः फलादिसाधनत्वपरमेव न तु कालांतरभावित्वेनौदना राम
दिकं विशेषणीयं। असिद्धत्वस्यात्कार्यानुत्पत्तेरित्यस्य चोत्पत्तिकाले कार्यसहवृत्तित्व

दी

घटितस्य कादशात्वस्याभावादित्यर्थ इत्याहुः॥ साध्यत्वं कृतिसाध्यत्वं तस्य कृत्यधीनसमयवं
धवत्वसंयोरूपत्वादिति भावः। असिद्धधर्मिंतु सत्तिकालीनधर्मः सिद्धतादशायां कृत्यधीनसम
यबंधविनाशादशायां तदभावात् कृत्यधीनसमयसंबंधवत्वरूपकृतिसाध्यत्वाभावात्।
एकदा एकक्षणे एकंवस्तु कृत्यधीनसमयसंबंधविशेषेनो विशिष्टअसिद्धंतुसत्तिकाली
नंयेन एकदासिद्धत्वेनासिद्धत्वेन च एकमिति प्राक्तनमनुवर्त्तते। एकदा एकक्षणे। अत्र
जरन्नैयायिका इति। अत्र इष्टाजनकत्वेन बलवदनिष्टाननुबंधिकृतिसाध्यत्वेन च मंड
लीकरणं जानंतो मंडलीकरणे प्रवृत्त्यापादाने जरन्नैयायिकाः जरंतश्च ते नैयायिकाश्च
प्राचीननैयायिका इत्यर्थः। वस्यमाणो समाधानमाहुरिति शेषः। कृतिसाध्यताज्ञानमेव
स्यत्रैवकारव्यवछेद्यमाह। नत्विष्टस्यादिकार्यताज्ञानादौस्यचादिनाशौचादिमत्त्वप्रति
संधानजन्यकार्यताज्ञानपरिग्रहः। गौरवादिष्टसाधनताविषयककार्यताज्ञानत्वा
पेक्षया इष्टसाधनताज्ञानजन्यकार्यताज्ञानत्वस्य गुरुत्वादित्यत इति। संध्यावंदनादावित्यर्थः।

६० नित्येपि संध्यावंदनादावपि बहुधाः फलमुक्तं इति । क्वचिद्विधिसमभिव्याहृतस्य क्वचिदर्थवादिक
60 स्य फलस्य श्रवणात् संध्यामुपासते ये तु सततं शंसितव्रताः विधूतपापास्ते यांति ब्रह्मलोकं सनातन स्म
न मित्याद्यर्थवादात् दद्याद्यो यादहरहस्त्वाद्धं पितृभ्यः प्रीतिमावहन्नु इति विधेश्च एवं संध्यावंदनस्य
प पापानुत्पादः पापक्षयश्च फलं यदह्ना पापमकार्षमिति मंत्रलिंगात् तं दोषानोपसर्पंतीति वच
नाच्च यद्यपि नित्ये सर्वत्र फलमुक्तमस्ति तथाप्यनुपेत्याहायत्र च फलं मुक्तं तिदिस्यादि । विश्व
जिन्न्यायाग्नि: फलमिति । विश्वजितो यथा स्वर्गः फलं तथान्यस्यापि नित्यस्य स्वर्गः फलं कल्प्यते । नित्या
करणे प्रायश्चित्तोपदेशात् तस्य पापहेतुत्वे नित्याकरणे पापानुत्पादे आवश्यकत्वं तथा च न विश्वजि
न्न्यायावकाश इत्यभिप्रायेणाह । प्रत्यवायपरिहारार्थेवेति । पापानुत्पादावेशस्यर्थः फलमित्यनेना
प्येवपि । न चैवमिति । एवं संध्यावंदनादिगोचरप्रवृत्तिप्रत्ययपोष्टे साधनताज्ञानस्य हेतुत्वे ६०
संध्यावंदनादे रितिदोषः । फलकामनाधीनकर्तृकत्वेइति । फलकामनाधीनः कर्त्तापि
स्य तत्फलकामनाधीनकर्तृकं तस्य भावः फलकामनाधीनकर्तृकत्वं तस्मिन्फलकामना रा

धीनकर्तृकत्वे इति विग्रह व्युत्पत्तौ। अत्र फलकामनाधीनत्वं कर्तृघटकत्वस्य यावत्पर्यंकृतो अन्वे
ति। यस्येति षष्ठ्यर्थ विषयत्वमपि निरूपकता संबंधेन तादृशावृत्तौ अन्वेति। सविशेषणे हि विधि
निषेधौ विशेष्ये बाधे विशेषणमुपसंक्रामत इति न्यायात्। तथा च फलकामनाधीनकर्तृक
त्वं इत्यस्य फलकामनाधीनकर्तृव्यत्वे इत्यर्थः। तेन ननु नहीत्यग्रिमग्रंथासंगतिः। काम्यत्वं का
म्यपदवाच्यत्वं। अन्यथा आपाद्यापादकयोरभेदप्रसंगः। नित्यत्वं नित्यपदवाच्यत्वं। नित्यता
नित्यतां नित्यपदवाच्यताञ्च छेदकं ब्रूम इति। नहीति प्रक्रान्तेनान्वयि। तथा च फलकामनाधी
नकर्तृव्यत्वेन नित्यपदवाच्यत्वाभावो नापादयितुं शक्यः फलकामनाधीनकर्तृव्यत्वस्य नि
त्यपदवाच्यतावच्छेदकाभावात्मकत्वादिति भावः। न त्वमिति। नित्यताब्रूम इति प्राक्तनेना
न्वयि। तत्कर्मकरणे प्रत्यवायजनकत्वरूपनित्यत्वं च। कामनोपाधिकर्तृव्यत्वेपि फलका
मनाधीनकर्तृव्यत्वेपि। न चैवमिति। एवं नित्यस्यापि फलकामनाधीनकर्तृव्यत्वे फले स
न्ध्यावंदनादिफले। नन्वेवमिति। एवं फलकामनाविरहकाले प्रवृत्त्यनुत्पत्तेरिष्टत्वे

६१ अधिकारिविशेषणं स्यात् अधिकारः स्यात्। फलस्वाम्यं ह्यधिकारः येन विनाकृतं कर्म न फलजनकं।
61 क्रियाहेत्वन्यत्वे सत्वैति फलाभावप्रयोजिकाभावप्रतियोगित्वेन तत्त्वमिति फलितं। अतएव इष्टसाध
नत्वाज्ञानं नाधिकारः तस्य क्रियाहेतुत्वात् न णाच नित्यस्थलेपि फलकामनाया अधिकारिवि
शेषणत्वे च फले नित्यफले पुरुषस्य फलकामनाशून्यापुरुषस्य। प्रत्यवायः पापं। तत्र फलका
मनाशून्यशुचिपुरुषस्य नित्याकरणे। प्रत्यवायः पापं। कामनाअधिकारिविशेषणमिति का
मनाया अधिकारिविशेषत्वमित्यर्थः। तथा च नित्यस्थले फकामनानाधिकारिविशेषणं किं
तु शौचमेवेति भावः। ननु वेदबोधितमिष्टसाधनत्वमपीति। नित्यस्येतिशेषः। त्यज्यत इति प्र
क्तेन मात्रानुवर्त्तते। प्रमाणिकत्वात् वेदरूपप्रमाणसिद्धत्वात्। न तु क्रियाहेत्वन्यत्वविशिष्टफ
लाभावप्रयोजकाभावप्रतियोगित्वमपि लक्षणमधिकारिविशेषणत्वे कामनायाः दुर्वारमत ६१
आह। कल्प्यतां वेत्यादिनाकरणमेव नित्याकरणमेव। साध्यत्वसाधनत्वयोरिति। कार्यता राम

वछेदकधर्मवत्वलक्षणसाध्यत्वकारणतावछेदकधर्मवत्वलक्षणसाधनत्वयोरित्यर्थः। कथमिति।
प्रवर्त्तकमित्यनेनान्वयि। अन्यथा साध्यत्वसाधनत्वयोर्विरोधांगीकारे। नवमीमांसकस्य। बलवद
निष्टाननुबंधित्वं बलवद्द्वेषविषयदुःखाजनकत्वं। बलवत्वं च द्वेषो जातिविशेषः आनुभाविक इति।।
विशेषणं सामानाधिकरण्यसंबंधेन विशेषणं। तेनेति मुक्तिरित्यग्रिमेणान्वयि। अतः कृति
साध्यत्वे बलवदनिष्टाननुबंधित्वविशेषणदोषो नातः ज्ञायते मधुविषसंपृक्तान्नभोजने ज्ञायते।
तदेति। तत्रेति शेषः। एवं च कृतिसाध्यत्वे बलवदनिष्टाननुबंधित्वस्य विशेषणत्वे चाद्यष्टसा
धनत्वे सतीति। इष्टसाधनविशिष्टेत्यर्थः। कं कृतिसाध्यतान्वयि। अत एव बलवदनिष्टाननुबं
धीष्टसाधनत्वे सति कृतिसाध्यत्वस्य विध्यर्थत्वादेव विष्टाभावः बलवदनिष्टाननुबंधीष्टसा
धनत्वविशिष्टकृतिसाध्यत्वाभावः। न कलंजं भक्षयेदिति। न कलंजं भक्षयेदित्यत्र विध्य
र्थनिषेधः विधिप्रतिपाद्यनिषेधः। कथमिति विधिप्रवृत्तिरित्यग्रिमेणान्वयि। तर्हि बलवदनिष्टा
ननुबंधीष्टसाधनत्वे सति कृतिसाध्यत्वस्य विध्यर्थत्वे श्येनेनेति। श्येनेन नामचे पयोगविशेष

णा।विधिप्रवृत्तिः विधिवाक्यजन्यशाब्दबोधः।अथवा।विधिप्रवृत्तिः विधिवाक्याल्लोकानां प्रवृत्तिः
६२ 62 नरकरूपबलवदनिष्टाननुबंधित्वादिति।तथाचश्येने बलवदनिष्टाननुबंधित्वघटितविध्यर्थ
बाधादिति भावः।वधसाधनमिति।अदृष्टाद्वारकमरणानुकूलव्यापारसाधनमित्यर्थः।वधः॥
अदृष्टाद्वारकमरणानुकूलव्यापारः।तत्रश्येने।आस्तिकानामिति।अस्तिपरलोकमिति।मतिर्ये
षां ते आस्तिकाः तेषामित्यर्थः।सा च हिंसा च विशेषितमिति।मरणानुकूलव्यापारश्चेमोमित्य
र्थः।तत्त्वापत्तेः।हिंसात्वापत्तेः।तर्हि मरणोद्देशेनानुष्ठीयमानत्वे सति अदृष्टाद्वारमरणानु
कूलव्यापारस्य हिंसात्वे कथं श्येनस्य हिंसात्वमिति चेत्।श्येनस्यादृष्टद्वारैव मरणानुकूलत्वा
दिति भावः।तेनापि रूपेणेति।इति साध्यत्वे सति बलवदनिष्टाननुबंधीष्टसाधनताज्ञानत्वेन ६२
बलवदनिष्टाननुबंधि इति साध्यत्वे सतीष्टसाधनताज्ञानत्वेन चेत्यर्थः।तदुक्तं।विनिगम
नाविरहेण कार्यकारणभावद्वयस्य भवन्मतेप्यावश्यकत्वे कार्यताज्ञानत्वादिनेति।इति साध्य द्वा

ताज्ञानत्वादित्यनेत्यर्थः। आदिना बलवदनिष्टाननुबंधित्वज्ञानत्वेष्टसाधनताज्ञानत्वयोः परिग्रहः॥ त
थाच स्वातंत्र्ये णकार्यताज्ञानत्वेन बलवदनिष्टाननुबंधिज्ञानत्वेनेष्टसाधनताज्ञानत्वेन च हेतुत्व
मिति भावः॥ लाघवादिति। बलवदनिष्टाननुबंधीष्टसाधनत्वे सति कृतिसाध्यत्वज्ञानत्वापेक्ष
या कृतिसाध्यताज्ञानत्वादेर्लघुत्वादित्यर्थः॥ लाघवमभिप्रेत्याह। वस्तुतस्त्विति। कृतिसाध्यता
धीत्वेनैवेति। एवकारेण बलवदनिष्टाननुबंधित्वज्ञानत्वेष्टसाधनताज्ञानत्वयोर्व्यवच्छेदः।
नत्वेवमिति। एवं कृतिसाध्यताज्ञानत्वमात्रेणैव चिकीर्षाहेतुत्वे इष्टापत्त्या समाधत्ते। स्यादे
व तु स्वादावितिआदिना दुःखाभावपरिग्रहः। पुनः शंकते। इष्टजनकत्वेनेत्यादिना मंडली
करणादाविति। एतदनेन रे बलवदनिष्टजनकत्वेन ज्ञाते मधुविषसंपृक्तान्नभोजनादौ ने
ति पूरणीयं। नन्विष्टसाधनताज्ञानसत्त्वे बलवदनिष्टजनकत्वज्ञानमूनाकाले बलवदनि
ष्टजनकत्वज्ञानं विनापि भोजनादाविच्छादर्शनादाह। बलवदनिष्टसाधनताज्ञानं वा प्रति
बंधकमिति। तथा च उपायेच्छां प्रति बलवदनिष्टसाधनताज्ञानाभावः कारणमिति भावः॥

विद्यमाने इच्छाविषयो य इति। विद्यमानाया इच्छा तस्या अपि विषयो य इत्यर्थः। तत्साधनत्वमिति। तेन
६२ न तत्र तस्य न भोजनादावि छा। स्वरूपसदिति। अज्ञायमानं विशेषणं फलांशविशेषणं तस्या अपि
63 इच्छाविषयत्वस्यापि। एवं च विद्यमानेच्छाविषयत्वस्य। फलांशे स्वरूपसिद्धिशेषणत्वेच॥
पाकादौ च सुखसाधनताधीः पाकादौ सुखसाधनताधीश्च। ननु विशिष्टमिति। ननु बल
वदनिष्टाननुबंधीष्टसाधनत्वे सति इति साध्यत्वं विनिगमकाभावादिति। पूर्वोक्तरीत्या
विनिगमकाभावादित्यर्थः। तस्य फलं न लक्षणस्य। किंतु बलवदनिष्टाननुबंधित्वस्येति। नन्व
र्थान्वय इत्यग्रिमे ग्रन्थः। सोऽयमिति। सः विध्यभिधायकप्रत्ययघटितवाक्यात्माश्रयमनु
पदं निरूपितः तदुक्तमिमिति। तत्र विधित्रैविध्यं तु केकोहितं। मीमांसकवृद्धैरिति शेषः। विधि
रत्यन्तमप्राप्तेइति। अत्यन्तमप्राप्ते यो विधिः सोऽपूर्वविधिः। यथा व्रीहीन्प्रोक्षतीत्यग्निहोत्रं जुहो
तीत्यादिः। तदेवं ह्यत्यन्ताप्राप्तं यस्य वचनेन विना केनापि न प्राप्तिः। नियमः पाक्षिके सतीति। ६२
यत्र विनापि वचनं पाक्षिकी प्राप्तिः सम्भाव्यते। तत्राप्राप्तपक्षपूरयन् यो विधिः प्रवर्तते स नियमविधिः सानि यंस्त्वान्नियम राम

दा

२

इत्युच्यते। यथा व्रीहीनवहन्तीत्यादिः। तंडुलनिष्पत्त्यर्थापेक्षं देवसिद्धोऽवघातो तेन प्राप्तिमात्रं विधेः फलं
कितर्हि प्राप्तांशपूरणं। तदाप्राप्तिपक्षे च तंडुलरूपायान्तरस्याप्तिप्रेरनूपूरणे सति प्राप्तेषां निवृत्तिः
असावर्थान्न वाक्यात्। परिसंख्या हि तथा स्यात्। उपस्थितानां चावहति निर्णयेन चैतदपहायान्यनि- ते
वृत्तिरूपफलं कल्पनावसरः। न च प्राप्ते सति विधिरयं प्रवृत्तो येनास्य परिसंख्यावदन्यनिवृत्त्यर्थ-
ता कल्प्येत। पदं तु प्रागेव प्रवृत्तमानेनानेन वैतुष्यसाधनानां नखविलुंचनादीनां प्रापदोधानाद- कूराक्षि
प्राप्तिः। कृता सा चार्थलभ्येति। तेनेदमपूर्वत्वमेतस्येति। तच्चोभयं चान्यत्र च प्राप्ते परिसंख्येतीति यस्तु नः प्राग- ति ५
चनानन्यत्र चान्यत्र च प्राप्नुयादिति संभाव्यते। सा परिसंख्या यथाभिनिच यथा इमामगृभ्णन्रशना-
मृतस्येत्यश्वाभिधानीमादत्ते इति इमामगृभ्णन्रशनामृतस्येति मंत्र इमां रशनां पूर्वपल्यानो-
गर्दभ्रशनयोरिति मंत्रलिंगं ब्रानान्हयेपि प्राप्तिरस्य मंत्रस्य स्यात् ततोऽश्वाभिधानीमादत्ते इति विधेर्गर्द-
भाभिधानीनिवृत्तिः फलमिति निर्णीयते। ननु मंत्रलिंगं श्रुतिं कल्पयित्वा रशनानयोदाशनं प्रा-
पयेत् न चाश्वाभिधानीमादत्त इति श्रुतिः तावद्विलंबं सहते। तथा चेयं प्रागेव प्रापयति। तथा च

६४ यत् प्राग्वचनात्तत्र चान्यत्र च प्राप्नुयादिति तदप्युक्तं । एवं । यस्य प्राग्वचनो चेत्तत्र चान्यत्र च प्राप्तियो
65 ग्यतात्तत्र परिसंख्यापगमात् पद्यश्वाभिधानीमादत्त इति वाक्यं न स्यात्तदोनयत्रैव मंत्रलिंगकल्पि
त वाक्यात् प्राप्तिः स्यादिति । अनेन वाक्येन प्रत्यक्षेण मंत्रलिंगस्य वाक्यांतरकल्पनसामर्थ्ये प्रप
हते केवलाश्वाभिधानीविषयत्वमस्य सिद्धमिति । नन्वेवमपाम विधिरेवायं संजात इति चेत् कः
संशयः न चैवं कथं परिसंख्येयमिति व्यपदेशः । फलेनैव तत्पाव्यपदेशात् गर्दभाभिधानी
निवृत्तेरस्य फलत्वात् अनेन तन्त्रापकवाक्यानुमानुप्रतिबंधेन प्राप्त्यनावात् । न चैवं प्राप
काभावादेव न प्राप्तिरिति कथं तत्रैतत्फलत्वमिति वाच्यं । एतद्वाक्याभावे मंत्रलिंगात् प्राप्तिः
स्यादेतत्सत्वे तु नेतरथेति । यत्सत्वे यत्सत्वं यद्व्यतिरेके च यद्व्यतिरेकस्तस्यैव तत्फलत्वादिति ।
उदाहरणानि त्रिविधविध्युदाहरणानि । व्रीहीन्प्रोक्षतीत्यपूर्वविधेरुदाहरणं । व्रीहीनवहंती ६४
ति नियमविधेरुदाहरणं । पंच पंचनखा भक्ष्या इत्यादि परिसंख्याविधेस्तूदाहरणं इत्यादौ राम
स्वत्रादिना इमामगृभ्णन्रशनामृतस्येत्यादि परिग्रहः । अत्र गुरव इति । अत्रेदं सोध्यं नन्वेवं के

वदनिष्टानन्वयाद्वेधित्वस्येति साध्यत्वानां मध्ये। अन्वयप्रकारस्य नेष्टसाधनत्वं विध्यर्थ इत्यनेन गुरुत्वइति
स्याद् इत्यग्रिमेणान्वयि। नेष्टसाधनत्वं विध्यर्थ इति। इष्टसाधनत्वेन स्वर्गकामो यजेतेति वि
धिनास्ति मतः। तस्य इष्टसाधनत्वस्य। बोधयितुं यागनिष्ठतया इष्टसाधनत्वबोधस्येति याव
त्। अशक्यत्वादिति। स्वर्गकामो यजेतेति विध्यन्वयत्वादित्यर्थः। स्वर्गकामो यजेतेति विधिजन
न्यशाब्दबोधीययागनिष्ठविषयतानिरूपितविषयत्वाभावादिति फलितार्थः। तेन हेतोर्न पक्षा
प्रसिद्धिः। तथाहि। नादृशेन विधिना तस्य बोधयितुमशक्यत्वमेव जानाति हि। स्वर्गकामस्येष्ट
साधनं याग इतीति। यागः स्वर्गकामेष्टसाधनमित्यर्थः। अनेनेति। स्वर्गकामो यजेतेति विधि
नेत्यर्थः। बोध्यं बोधनीयं। इष्टं चाचेति। अत्र एतद्विधिजन्यशाब्दबोधविषयीभूतो इदं यागे स्वर्ग
रूप स्वर्गकामेष्टसाधनत्वबोधनं। शक्यं स्वर्गकामो यजेतेति विधिजन्यं साक्षात्साध
नत्वस्य कालान्तरभावि स्वर्गादिरूपेष्टस्य साक्षात् साधनत्वस्य। नेत्युक्तो विनाशित्वेन या
गस्य तु विनाशित्वेन असंभवात् यागेऽसंभवात्। इष्टस्य साक्षात् साधनत्वेन स्वर्गका

मो यजेतेति विधिजन्यशाब्दबोधीययागनिष्ठविषयतानिरूपितविषयतावत् यागनिष्ठाभावप्र
९५ तियोगित्वेन ज्ञायमानत्वादित्यत्र तात्पर्यं । परंपरया स्वर्गसाधनत्वं स्वर्गजनकापूर्वजनकत्वं ।
65 नापि कार्यत्वमिति । न कार्यत्वमपीत्यर्थः । अत्र विधप्रत्यय इत्यनुवर्त्तते । कार्यत्वं च कृतिसाध्यत्वं
स्वर्गकामकार्यत्वस्य यागे बोधयितुमशक्यत्वादिति । विधिरिति शेषः । तथा च गेयो विशेष्य
क स्वर्गकामकृतिसाध्यत्वप्रकारकबोधस्य स्वर्गकामो यजेतेति विधिवाक्याजन्यत्वात् स्व
र्गकामो यजेतेति विधिजन्यशाब्दबोधीययागनिष्ठविषयतानिरूपितविषयत्वाभावादिति
यात् । तेनहेतोर्न पक्षावृत्तित्वं । न याहीति निरूढलक्षणात्वमेव मानी हि । योग्यता चान्वयप्रयो
जकरूपवत्त्वमिति । यत्पदार्थे यत्पदार्थस्यान्वयो विवक्षितस्तत्पदार्थे तत्पदार्थान्वयप्रयो
जकरूपवत्त्वं । अन्वयप्रयोजकत्वं च अन्वयस्वरूपायोग्यावृत्तित्वं यथा घटेनजलमाह ९५
रेत्यादौ छिद्रेतरघटत्वं छिद्रस्य जलाहरणान्वयस्वरूपायोग्यत्वेन तद्वितरघटत्वस्य तद्वृत्ति
त्वात् न त्वापि छिद्रेतरत्वमात्रं दण्डादिसाधारणमिति घटत्वमुपात्तं । घटत्वे चात्र जलाहरणा राम

स्वरूपयोग्यसंस्थानविशेषवत्त्वं। संस्थानं चात्र विजातीयतत्तद्‌वयवसंयोगविशेषोऽनुभवसिद्धः अत एवान्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वादेव सेकान्वयप्रयोजकं विजातीयद्रवद्रव्यसंयोगान्वयप्रयोजकं। तद्योग्यमिति। पयसा सिंचतीति वाक्यं योग्यमित्यर्थः। नास्तीति सेकान्वयप्रयोजकद्रवद्रव्यत्वमित्येतेनान्वयि। तदयोग्यं वह्निना सिंचतीति वाक्यमयोग्यं। कामिकार्यत्वान्वये स्वर्गादिरूपफलकामनावत्त्वमिति साध्यत्वान्वये इष्टसाधनत्वे इच्छाविषयीभूतस्वर्गादिफलजनकत्वं अन्वयप्रयोजकं अन्वयस्वरूपयोग्यतावच्छिन्नतदिष्टसाधनत्वं। इत्युक्तमिति। आशुविनाशिनो यागादेः स्वर्गादिध्वंसजनकत्वासंभवः। परंपरयाऽदृष्टकापूर्वानुपस्थित्या यागे परंपरया स्वर्गादिसाधनत्वमपि बोधयितुमशक्यमित्युक्तमिति तस्मादिति। इष्टसाधनत्वस्य तत्साध्यत्वे बोधविषयत्वाभावादित्यर्थः। कार्यमपूर्वमेवेत्यर्थः। कार्यत्वरूपेण कार्यमपूर्वमेवेत्यर्थः। तस्मिन् व्यापूर्वरूपे कार्ये च विषयतयेति। अपूर्वमपि मुख्यम् तेन विषयकमिति भावः। पूर्वमिति। ताद्वशबोधस्यैवेत्यर्थः। न च अपूर्वे कार्यसामान्य एव घटा

दिरूपकार्यत्वा शक्तिग्रहः विशिष्टशक्तिग्रहः योग्यताबलाच्च इतरबाधबलाच्च अपूर्वस्यैव लोकमितः
९९ कार्यत्वरूपेण पूर्वव्युत्पत्तेर्योगे विषयतयाऽन्वयः इतरबाधमेव दर्शयति नहीत्यादिना अन्यत्र
८० अपूर्वादन्यत्र स्वज्ञानादेरपि संभवादिति अपूर्वभिन्नस्य यागादिविषयकस्य स्वज्ञानादेरपि संभ
वादित्यर्थः स्वज्ञानादेरित्यादिना स्वेच्छापरिग्रहः नन्वपूर्वस्येत्यारंभकापा समाधानमुक्तमथवेत्या
दिना तदुपदिष्टस्वरूपतामुक्त्वा स्वज्ञानादेरपीत्यादिना तदुपरि समाधानमाह उच्यत इत्यादिना उच्य
रूप ते सिद्धान्ते कार्येऽपूर्वे कार्यतावसप्रमतः तत्र स्वर्गकामकार्यमिच्छेकामी फलकामः नियोज्य
इति नियोज्यत्वं च तत्कामिकर्तृतया प्रतीतिजनकत्वं तच्च कामनाविशिष्टएवास्ति कामिकर्तृतया
स्वर्गकामादिरूपतिसाध्यतया प्रतीयमानत्वं प्रतीतिविषयत्वं मतं चान्वये नियोजकत्वं रूपान्वय
स्यावबोधे प्रयोजकज्ञानं निष्कारणताऽपि विषयतासंबंधेनावच्छेदको काम्यसाधनत्वं इष्टसा
धनत्वं एतत् ह्यान्वयप्रयोजकरूपत्वरूपयोग्यता स्वान्न हीति नेति अपूर्वे तोऽपि मगाच्छृणोति हि हेतौ ॥ ९९
कामी स्वर्गादिरूपफलकामः काम्यात् स्वतः सुन्दरात् अन्यत् जितं काम्यसाधनत्वे न इष्टसाध राम

नत्वेन। कार्यतयावृत्तिसाध्यतया। ननु काम्यासाधनस्यापि काम्यसाधनज्ञानत्वदशायां कार्य
तयाज्ञानप्रसंगः। तदनंतरं च काम्यासाधनेपि स्वर्गादिकाम्यनियोज्यनियोजकभावसंबंधेनान्व
यप्रसंगादित्यत आह। न च काम्याद्यसाधनमित्यादि। अन्यथाख्यातेश्चेमस्या। अननुपगमात्। अस्वी
कारात्। गुरूणामिति शेषः। गुरुमते ज्ञानीयकाम्यसाधनत्वप्रकारतया काम्यासाधननिष्ठवि
शेष्यत्वानिरूपितत्वाभावादिति तु पर्यवसितोर्थः। अतो न सिद्ध्यसिद्धिभ्यां व्याघातः। ज्ञानं यागवि
षयकज्ञानं। अतः यागविषयकज्ञानस्य स्वर्गादिरूपकाम्यसाधनत्वासंभवात्। योग्यताबला
दिति। काम्यसाधनत्वरूपयोग्यताबलादित्यर्थः। इदं च भवनवमिस्यगिमेणान्चेयि। अपवायोग्य
ताबलादिरूपस्य प्रचरतद्रव्यगुणकर्माणि विहायेत्यर्थः। यागविषयकं कार्यं स्वर्गकामीयमितिका
र्यमुख्यविशेष्यकान्वयबोधो गुरुमते इति बहुसंमतं स्वर्गकामो यागविषयककार्यवानित्येवेति
स्वर्गकाममुख्यविशेष्यकान्वयबोधो गुरुमते इति न बहुसंमतं। अतो वाकादौ स्वरसः सूच

६७ कत्वेन व्यावर्त्त्य इति ध्येयं। योग्यतया कामि कामि कार्यतया प्रतीयमानत्वरूपयोग्यताज्ञानेनाऽऽलंब
नेविषयीकरोति। एवं चामुना प्रकारेण। काम्ये स्वर्गकामो यजेतेत्यादिकाम्यस्थले कृत्साध्यताशक्तिः अपूर्व
67 कृत्साध्यताशक्तिः। नित्ये अहरहः संध्यामुपासीतेत्यादिनित्यस्थले निषेधे च न कलंजं भक्षयेदित्यादिनिषे
धस्थले च अपूर्वमाह। कार्यत्वरूपेणापूर्वमाह। तथा चाहरहः संध्यामुपासीतेत्यादावहरहः संध्यो
पासनविषयकं कार्यमित्याद्यन्वयबोधः। न कलंजं भक्षयेदित्यादौ च कलंजभक्षणाभावविष
यकं कार्यमित्याद्यन्वयबोधः। ननु यदि कार्ये क्रियासाधारणी शक्तिस्तदा नित्यापूर्वनिषेधापूर्वयोरु
लाभः तत्र संध्योपासनं कार्यमित्यभेदान्वयबोधस्य कलंजभक्षणाभावः कार्य इत्यभेदान्वयबो
धस्य च संभवेनापूर्वविषयकबोधमानाभाव इति चेन्न। धात्वर्थप्रत्ययार्थयोरभेदान्वयस्याव्यु
त्पन्नत्वात्। एवं च वैदिकलिङ्त्वावच्छेदेन कार्ये शक्तिकल्पनात् सामग्रीबलादेव कार्यत्वरूपेणापूर्वं ६७
पूर्वस्य नित्यस्थले भानात्। न च यर्वा नोद्वाधीनू यथा सते घटो न कार्य इत्यादितो घटाभावः कार्य राम

इत्यननुगमात्। उद्देश्यतासंबंधेन शाब्दबोधं प्रति न रूपद्वयस्योपस्थिते विशेष्यतासंबंधेन हेतुत्वात्।
न चाचकत्वं जनन सामान्याभावः। कार्य इति बोधासंभवेत ज्ञाप्यपूर्वभानात्। न चाभेदसंबंधेन कत्वं जनन सामा
नाधीपं सार्यमिति बोधोस्तु अभेदसंबंधेन नञर्थस्यानन्वयात्। अभावो न घट इत्यादितस्तथा अ
ननुभावात् अपूर्वेनान्वयीसंभवादिति। लौकिककर्मणोऽपूर्वजनकत्वे मानाभावादिति भावः॥
अत्र गुरुमतेउच्यते दूषणमुच्यते लाघवात् कार्यत्वविशिष्टशक्तिकल्पनापेक्षया कार्यत्वे शक्तिक
ल्पने लाघवात्। एवकारव्यवच्छेद्यमाह। न त्वित्यादि। योग्यताज्ञानविरह इति। इष्टसाधनत्वरूपयोग्य
ताज्ञानाभाव इत्यर्थः। अन्वयप्रयोजकरूपवत्त्वं द्रव द्रव्यत्वरूपान्वयप्रयोजकरूपवत्त्वं सेकानन्व
यितायेपि समुद्रमध्यस्थादितोयेपि। सत्त्वात् द्रवद्रव्यत्वस्य सत्त्वात् प्रकृतसंसर्गवत्त्वं एकपदा
र्थेऽपरपदार्थस्य फलीभूतशाब्दबोधविषयसंसर्गवत्त्वं। तस्य च प्रकृतसंसर्गवत्त्वस्य च सं
वायसाधारणं संज्ञानिष्ठमपसाधारणं। ज्ञानं ज्ञानत्वं हेतुः हेतुतावच्छेदकं। न चेति। न संभवती

६८ स्यपि मेलान्वयि। येन योग्यताज्ञानविरहे ॥ एवं स्यात् यागे स्वर्गकामकृतिसाध्यत्वान्वयबोधासंभ
वः स्यात्। उक्तं बाधकमित्याति। साक्षात्साधनत्वस्य अप्रसिद्धिनानिशिनियागदाव संभवः परंपराघट
68 कापूर्वानुपस्थित्या परंपरासाधनत्वमपि यागादौ बोधयितुं न शक्यते इत्येवं रूपं बाधकं मिश्रपैः॥
साक्षात्परंपरात्वे साक्षात्वे परापरात्वं उदरस्य स्वकासाधनता सामान्यस्य साधनतावच्छिन्न सा
धनतायाः लिङा लिङ्‌लकारेण उदरस्य अविषयीकृत्य रूपसामान्यज्ञानं रूपत्वावच्छिन्नेज्ञानं एकु
विशेषबाधे तत्ल्लाहरणाकरणात्वे अध्येपतासंबंधेन छिद्रघटबाधे ज्ञानज्ञाने ज्ञानबोधः। तद्भिन्न विशे
षप्रकारतानिरूपितं तस्माच्छिद्रघटरूपैकविशेषपात् इतरोभिन्नः। छिद्रेतरघटत्वस्य विशेषोषावेल्ल सरूपं
छिद्रेतरत्वं तत्प्रकारतायानिरूपितं तादात्म्यसंबंधेन व्याप्यः अतः एकविशेषबाधे इत्यादि निपमात्।
साक्षात्त्वबाधे साक्षात्साधनत्वबाधे परंपरात्व प्रकारकं परंपरासाधनत्वत्व प्रकारकंज्ञानं का ६८
र्यउत्पाद्यते च परंपरासाधनत्वप्रकारकज्ञानंच दारानुपस्थितेरिति अपूर्वरूपद्वारानुपस्थि राम

रित्यर्थः। ननु नष्टेतरत्वेन न तु छिद्रेतरत्वेन तदुपस्थापकाभावादिति तेन न छिद्रेतरत्वेन रूपेणोपस्थाप
काभावादित्यर्थः। तदुपस्थितेरिति तेन छिद्रेतरत्वरूपेणोपस्थितेरित्यर्थः। मानाभावादिति। छिद्रेत
रत्वेन तात्पर्यग्रहेपि घटेनेत्यादिनाबोधात् तत्सत्तायां छिद्रेतरत्वेनोपस्थितौ मानाभावादित्यर्थः। अ
स्तु वेत्यस्य समाधत्ते आस्तां वेति। अत्रापि स्वर्गकामो यजेतेत्यत्रापि साक्षादन्यसाधनत्वप्रकारेणैवान्वय
इति। साक्षादन्यसाधनत्वप्रकारेणैव साक्षादन्यसाधनत्वान्वयाबोधकस्यर्थः। किं नः छिन्नमिति। नः
अस्माकं किं छिन्नमित्यर्थः। आशुविनाशिनः फलपूर्वकालवृत्तिध्वंसप्रतियोगिनः कालांतरभावि
फलजनकत्वे स्वध्वंसाधिकरणकालध्वंसाधिकरणकालोत्पत्तिकफलजनकत्वे इह यागे तथाज्ञानं
फलपर्यंतस्थायिव्यापारजनकत्वस्यानं योग्यतावनिरासादिति सैकान्वयितो येपीत्यादिनायं य
न योग्यतावनिरासादित्यर्थः। नन्वेवमिति एवं अन्वयप्रयोजकरूपवत्वस्य योग्यतात्वानंगीकारे। आ
शुविनाशिनः फलपूर्ववृत्तिध्वंसप्रतियोगिनः कालांतरभाविफलजनकत्वस्य तत्कालस्थायिभाव

व्यापकत्वव्याप्तेरिति तत्कालस्थायी फलसंगस्थायी भावव्यापारः भावरूपो व्यापारो यस्य स तत्काल
६९ स्थायिभावव्यापारकः तस्य भावस्त्वं तस्मात्तेरित्यर्थः। प्रागध्वंसमादायाप्तिरवारणाय भावेति॥
६९ अनुमानाकारस्तु यागः फलसंगस्थायिभावरूपव्यापारवान् आशुविनाशित्वे सति कालान्तरभावि
फलजनकत्वादिति। तदुक्तमाचार्यैरिति। आशुविशिनो ननः फलकालस्थायिव्यापारजनकं तदुक्तं
कथितं। आचार्यैः हृदनाचार्यैः चिरध्वस्तमिति। चिरध्वस्तं फलपूर्वं स्वरागद्धिध्वंसप्रतियोगिकर्मयागा
गादिं अतिशयं व्यापारं विना फलाय फलजनयितुं नालं न समर्थं॥ चिरध्वस्तकारणस्य व्यापारस्य
दैव हेतुत्वं यथा अनुभवस्य संस्कारद्वारैव हेतुत्वं धर्मिकल्पनातः फलकालस्थाय्यपूर्वरूपधर्मिक
ल्पनापेक्षया धर्मकल्पनायाः फलकालस्थायिस्वरूपधर्मकल्पनायाः लघुत्वादिति धर्मिकल्पनायां
धर्मधर्मिणोरुभयोरेव कल्पनीयत्वात् धर्मकल्पनायामेकस्यैव कल्पनीयत्वादिति भावः। स्थायि ६९
त्वं फलकालस्थायित्वं प्रयुक्तं युक्तिसिद्धं न त्वपूर्वमिति प्रयुक्तमिति प्राक्तनेनान्वयः। नचैवमिति॥ राम

एवं यागादेः फलकालस्थायित्वे इदानीं यागादिकर्तृदिनोत्तरदिने यागप्रयत्नसत्तापत्तिः' प्रयत्नस्य वि-
षयत्वापत्तिः विषयतासंबंधेन प्रयत्नस्यापत्तिरिति यावत् द्वितीयक्षणे एव योग्यत्वादिति। न चाच न
दानीं यागप्रयत्नसत्तापत्तिरिति भावः। इदानीं यागोऽस्त्यपि कर्तृदिनोत्तरदिने द्वितीयक्षणभि-
न्नक्षणे वा न यजेयमिति इष्टसाधनीभूतयागाभाववानिति प्रयत्नस्य विरोधात् विधिभिन्नोऽर्थवाद इति
विधिभिन्नवाक्यमर्थवाद इत्यर्थः। स तु अर्थवादस्त्रिविधः। त्रिविधार्थवादविभाजकोपाधिमान्तं त-
दुक्तमिति तत्र अर्थवादस्य त्रैविध्यमुक्तं, कथितं च वृद्धैरिति शेषः। विरोधे गुणवादः स्यादिति। विरोधे अयो-
ग्यत्वे सति योऽर्थवादः स गुणवादः गुणवादनामार्थवादः यथा आदित्यो यूपः' अनुवादोऽवधारिते इति प्र-
माणान्तरेणानिश्चितार्थकत्वे सति योऽर्थवादः सोऽनुवादः अनुवादनामार्थवादः यथा अग्निर्हिमस्य भेषजं
भूतार्थवादस्तद्धानादिति। तयोः अयोग्यत्वप्रमाणान्तरान्यनिश्चयविषयार्थकत्वयोः हानात् त्या-
गात् योऽर्थवादः सः भूतार्थवादः भूतार्थनामार्थवादः यथा स्वर्गार्थवादो यन्न दुःखेन संभिन्नं न च

यत्समनंतरं। अभिलापोपनीतं च तत्सुखं स्वः पदास्पदमिति। अर्थवादहिन्नधामत इत्यमुना प्रकारेण
७० अर्थवादहिन्नधामत इतिरूपार्थः। सोऽयं शास्त्र इति। स्वविध्यवादार्थवादान्यतद्रूपः अयमनुपदं निरूपि
70 तः। अनित्यत्वे सादि प्रागभावयोः प्रतियोगी उत्पन्नो गकारो विनष्टो गकार इति प्रतीतेरिति उत्पन्नत्व प्रका ९२
रकप्रमितिविषयत्वे सति विनष्टत्वप्रकारकप्रमितिविषयत्वादित्यर्थः। अत्र गुरव इति। अत्रानित्यत्वसा
धकहेतौ गुरव इत्याहुरित्यनेनान्वयि। तथा च अनित्यत्वसाधकहेतौ गुरवः सप्रतिपक्षमुद्भा
वयांचक्रुरिति भावः। नित्यः शब्द इति न्यायेन नित्य इत्यर्थः। निर्दिष्टो कदाचिदनित्यत्वस्य साध्यतामतः
स्यादतामूलोक्तक्रमेणापक्षसाधनयोर्निर्दिष्टाः। को मे कगुणत्वात् आकाशमात्रगुणत्वात्सदिमा
णवत् आकाशपरिमाणवत् अप्रयोजकत्वेऽपि तदनुमानस्याप्रयोजकत्वं अप्रयोजकमिति पाठे तु ए
तदनुमानमप्रयोजकं अन्यथा शब्दस्य नित्यतां विना प्रत्यभिज्ञानस्य तत्ताविशिष्टेदताविशिष्ट ७०
योरभेदप्रत्ययस्य अनुपपत्तेरिति। नवन्मते पूर्वानुभूतगकारस्य इदानीं नष्टत्वात्तदभेदस्य दाम

इदानीं तन गकारे अभावादिति भावः। न चानुमितिरयं सोयं गकार इति प्रत्यभिज्ञानत्वे न व्यवच्छिद्य मा
नाः साक्षात्कारः" भ्रम इति न हि भ्रमात् स्वसिद्धिरिति भावः। न चेदं भ्रम इत्युक्तः पाठः बाधकाभावादि
ति इदन्ताविशिष्टगकारे तत्ताविशिष्टगकाराद्भेदस्यांगीकारे बाधकाभावादित्यर्थः। उत्पत्त्यादिप्र
तीतिः उत्पन्नो गकारो विनष्टो गकार इति प्रतिबाधिको इदन्ताविशिष्टगकारे तत्ताविशिष्टगकाराभेदस्यां
गीकारे बाधिका तथा च पूर्वगकारस्य नष्टत्वादिदानीं तनगकारस्योत्पन्नत्वादनयोर्भेदेनाभेदासं
भव इति भावः तस्याः उत्पन्नो गकारो विनष्टो गकार इति प्रतीतेः। व्यञ्जकवायुसत्त्यादिविषयत्वादिति
गकारव्यञ्जकोपावायुस्तन्निष्ठोत्पत्त्यादिविषयत्वादित्यर्थः। तथा चान्यनिष्ठोत्पत्त्यादिप्रतीतिः सो
यं गकार इति प्रत्यभिज्ञानस्याप्रमात्वेन बाधिकेति भावः। तन्नेति। नस्कारककारवचनेन न सम्यक् ग
कारगतत्वेन गकारनिष्ठत्वेनोत्पत्त्यादीति। आदिनाध्वंसपरिग्रहः। तथा च गकारगतत्वेनोत्पत्त्यादि
प्रतीतेर्व्यञ्जकवायूत्पत्त्यादिविषयकत्वसंभव इति भावः। न चासो भ्रान्तिरिति। अयं सो गकारगतत्वे

नौत्पत्त्यादिप्रतीतिः भ्रान्तिः। गकारगतत्वांशे भ्रान्तिः बाधकाभावात्। तादृशप्रतीतेर्गकारगतत्वांशे प्रमा
७१ त्वे बाधकाभावादिति न स्वप्रत्यभिज्ञानं बाधकमिति गकारगतत्वेनोत्पत्त्यादिप्रतीते गकारगतत्वांशे प्रमा
७। त्वे सोऽयं गकार इति प्रत्यभिज्ञानं बाधकमित्यर्थः। अनयैवेसेति। अनयैव गकारगतत्वेनोत्पत्त्यादिप्रती
त्यैव सोऽयं गकार इति प्रत्यभिज्ञानं नयैव तद्बाधितमिति पाठः साधीयान्। नयपक्षे विनिगमकमस्तीति। अत्र
उत्पत्त्यादिप्रतीति प्रत्यभिज्ञानयोर्बाध्यबाधकत्वे विनिगमकमस्ति। एकतरपक्षपातिनी युक्तिरस्ति। एवं वि
निगमकाभाव इति। उत्पत्त्यादिप्रतीति प्रत्यभिज्ञानयोर्बाध्यबाधकत्वे विनिगमकाभावे विनाशादिप्रत्ययस्ये
वेति आदिपदेनोत्पत्तिपरिग्रहः। एवकारेण प्रत्यभिज्ञानस्य व्यवच्छेदः। विनिगमकाभावात्। एकतरप
क्षपातियुक्त्यभावात्। उभयोरेवेति। उत्पत्तिविनाशप्रत्ययप्रत्यभिज्ञानयोरेव न तूभयोर्मध्ये एकस्यैव प्रमा
त्वं यथा पूर्वं कल्पमेतदिति। एतद्धुत्पत्तिविनाशप्रत्ययप्रत्यभिज्ञानयोः प्रमात्वं तथा च सतीति प्रत्य ७१
भिज्ञानस्य गत्वावच्छिन्नभेदाभावविषयकत्वे च सतीति गकारो यमिति त्र्यस्योत्। इति प्रत्यभिज्ञाने राम

स्याद्गकारोऽयमित्याकारः स्यादित्यर्थः। ननु सोऽयमितीति प्रत्यभिज्ञानस्य सोऽयमित्याकारो न स्यादित्यर्थः।
तद्व्यक्तित्वावच्छिन्नाभिन्न इति पूर्वानुभूतगव्यक्तित्वावच्छिन्नाभिन्न इत्यर्थः। प्रकृते गत्वेन तद्व्यक्तित्वावगा
ह्यनुव्यवसाय इति भावः। तथा च सतीति सोऽयमिति प्रत्यभिज्ञानस्य तद्व्यक्तित्वावच्छिन्नाभिन्नार्थक
त्वे च सतीत्यर्थः। तज्जातीयोऽयमिति स्यादिति पूर्वानुभूतगजातीयोऽयमित्याकारः स्याद्गत्वजाति
त्वामवभासनादिति। सोऽयं गकार इति प्रत्यभिज्ञानेन गत्वजातित्वाविषयत्वापत्तेरित्यर्थः। अत्र तु गत्वेजा
तित्वं विषयत्वं च तज्जातीयोऽयमित्याकारो बोध्यः। तदपि महद्वचनमपि न न संभवत्युक्तदोषात्॥
गुरुमतदूषणप्रस्तावोक्तदोषात् दूषणान्तरमाह शब्दस्य द्रव्यत्वे मानाभावाच्चेति साक्षात्सं
बन्धेनेति। समवायलक्षणसाक्षात्सम्बन्धेनेत्यर्थः। ननु शब्दस्य गुणत्वे तदाश्रयीभूताकाशद्रव्ये
ऽन्तरं कल्पनीयमिति गौरवं। शब्दस्य द्रव्यत्वे तु तदाश्रयद्रव्यान्तरकल्पने च लाघवमिति मतमा
ह। शब्दस्येत्यादिना अवयवाद्दूषणान्तरमाह। शब्दस्येत्यादिना बहिरिन्द्रियग्राह्यत्वापत्तेः। बहिरिन्द्रि

पयाप्त्वा भावापत्तेः॥ तदपि अन्येषां वचनमपि ध्वन एव गुरुमतदूषणं प्रस्तावोक्तदूषणादेव दूष्यं ता
७२ सिद्धेश्चेति स्फोटरूपदूष्यं तासिद्धेश्चेत्यर्थः। ध्वनिवर्णभिन्नस्यैव शब्दत्वेनाबादित्यत्वं तास्यर्थमतो नहि
७२ ध्यासिद्धिव्याघातः॥ नहीति हि यतो सइति वर्णान्यः स्फोटात्मकः प्रमाणासिद्ध इत्यर्थः। तथाहि वर्णान्यस्फो
टात्मकस्य प्रमाणासिद्धत्वमातीहि। वर्णकदंबरूपाणां वर्णसमूहरूपाणां आनुपूर्विनाशितयात् तती
यस्मादृत्तिध्वंसप्रतियोगितया मेलनासंभवात् एकस्मिन्नेवस्थापि वा संभवात्। अप्रत्यक्षत्वं प्रत्य
क्षाविषयत्वं निरूढं निःसंदिग्धं तथा च वर्णकदंबरूपाणां पदानां प्रत्यक्षाविषयत्वे तदप्रत्यये वर्णकदं
बात्मकपदज्ञाने कुतः कस्मात् अर्थप्रत्ययः घटादिरूपार्थशाब्दबोधः स्यात् नक्वे तातस्मात्कथामान
येत्यादिवाक्यात् घटादिशाब्दबोधाभावप्रसंगात्। पदार्थः पदार्थविशेषः स्फोटः स्फोटनामा अभ्युप
यः स्वीकर्तव्यः यतः यस्मात् पदार्थात् अर्थप्रत्यय इति प्रत्यय इति। घटादिशाब्दबोध इत्यर्थः। तदसुद्धं। ७२
तत्र स्फोटस्य वर्णव्यस्फोटयोग्यत्वं अशुद्धेन प्रमाणासिद्धमित्यर्थः। सहि अर्थप्रत्यायको हि स्फोटनो राम

मा पदार्थः तावद्वर्णव्यंग्यः वर्णकदंबरूपपदघटकयावद्वर्णव्यंग्यः तावतां मध्ये वर्णकदंबरूपपदघट
कयावद्वर्णानां मध्ये। तावद्वर्णाभिव्यक्तिव्यंग्यो वा वर्णकदंबरूपपदघटकयावद्वर्णाभिव्यक्तिव्यंग्यो वा
नाद्यः। न तावद्वर्णव्यंग्यः आशुविनाशिनां तृतीयक्षणावृत्तित्वे सप्रतियोगिनां क्रमिकाणां क्रमोत्प
न्नानां तेषां वर्णकदंबरूपपदघटकबहुवर्णानां मेलनासंभवात् एकस्मरणवस्तोपि वा संभवो
न द्वितीयः। न तावत्तां मध्ये यत्किंचिद्वर्णव्यंग्यः घकारादमात्रोच्चारणे घटपदघटकघकारादिमात्रोच्चा
रणे घटपदस्फोटप्रत्यये घटपदस्फोटज्ञाने अर्थप्रत्ययापत्तेः घटबोधापत्तेः। ननु चरमवर्णस्य
व्यंजकत्वं वाच्यम् तत्र आह। वर्णान्तरवैफल्येति। नांत्यः न तावद्वर्णाभिव्यक्तिव्यंग्यः तदसंभवात् तान्ति
वद्वर्णाभिव्यक्त्यसंभवात् न तद्व्यंजकः स्फोटव्यंजकः तर्हि पूर्ववर्णगोचरसंस्कारसहितस्य चरमवर्ण
स फलेन एव स्फोटव्यंजकत्वे एव पूर्वपूर्ववर्णगोचरसंस्कारसहकृतस्य चरमवर्णस्य फलेन एवमर्थ
प्रत्यायकोस्तु। घटादिबोधजनकोस्तु, कृतं व्यर्थं, पदप्रतीतिबलात् घटपदादिज्ञानबलात् तर्हि
द्धिः। पदप्रतीतेः स्फोटान्यस्य विषयस्य वक्तुमशक्यत्वादिना वः। तस्य पदप्रतीतिरूपबलस्य

क्रमविशेषवत्तावद्वर्णगोचरत्वात् क्रमविशेषवान व्यवहितपूर्वीपरीभावापन्नत्वरूपक्रमविशेषवा
७३ न्यथा तदत्वादिरूपमविशेषवान्वा यसंस्काराद्वा तावद्वर्णगोचरेति। पदघटस्तावान्वर्णस्तद्गो
73 चरत्वात् तावद्वर्णगोचरप्रत्यय एव पदघटकानेकवर्णगोचरप्रत्ययसंस्कारात् प्रत्येकतावद्व
र्णगोचरानेकसंस्कारात् प्रत्येकतावद्वर्णगोचरानेककौनेकवर्णविषयकेत्यर्थः। तावद्वर्णमा
त्रं पदघटकानेकवर्णमात्रं अन्यथा तावद्वर्णमात्रस्य अर्थप्रत्यायकत्वे नदीदीनयोरविशेषापत्ते
रिति। नदीपदादिवदीनपदादपि नद्या बोधापत्तेरित्यर्थः। आनुपूर्वीविशेषविशिष्टतावद्वर्णरूप
मिति। घाव्यवहितोत्तरत्वादिरूपानुपूर्वीविशेषविशिष्टघटपदादिघटकटादिवर्णरूपमित्यर्थः॥
न चैतस्य घः संभवतीति न चानुपूर्वीविशेषप्रत्ययः संभवतीत्यर्थः। घोत्तरत्वे हीति। घाव्यवहितोत्त
रत्वे हीत्यर्थः। अव्यवहितोत्तरत्वसंबंधेन टवत्त्वेत्यर्थः॥ श्री॥ इति विधिवादः॥ ॥श्रीः॥ ॥अथापि
त्तिरिति। अर्थापत्तिशब्दवाच्यप्रमितिप्रमाणांतरं। प्रत्यक्षप्रमित्यादिचतुष्टयान्यतमभिन्नप्रमिति ७३
करणं। तथाहि। अर्थापत्तिपदवाच्यस्य प्रमाणांतरत्वं जानीहि। पीनो देवदत्तो दिवा न भुंक्ते इत्यत्र दाम

स्य पानंतरमिति पीनत्वविशिष्टजीवि देवदत्तस्य दिवाभोजित्वनिराशापानंतरमित्यर्थः दिवाभोजिनः
पीनत्वं दिवाभोजिनो देवदत्तस्य पीनत्वं रात्रिभोजनं न मत्तदेशानुपपन्नमिति रात्रिभोजनं विनाऽसं
न वात्यर्थः। इत्तातिा इतिहेतोः इत्यर्थः। तत्कल्पयति। रात्रिभोजनं कल्पयति। अत्रादिवाभोजित्वेन ज्ञातस्य
देवदत्तस्य रात्रिभोजनं प्रत्यक्षादीति। आदिनाऽनुमानोपमानशाब्दपरिग्रहः॥ सैवमनुपपत्तिर्थी
देवमर्थापत्तिः। अर्थापत्तिपदवाच्यातदर्थापत्तिरिति पुस्तके पाठः। यत्रैवं पद्धतेन तुक्तेन मेवं दि
वाभोजित्वे सति पीनत्वाभाववत्। यथा दिवाभोजि। यथा दिवसभोजि। दृष्टांतेन दिवाभोजित्वे तूपविशेष
णाभावाविशिष्टाभावो बोध्यः। व्यतिरेकिसौव अनुमानेनेति शेषः। उपपत्तेः रात्रिभोजनस्य सिद्धेः। के
वलव्यतिरेकिणा एव अनुमानस्येति शेषः। शाब्दविशेषः। इति होवाच इति हेतुरिति प्रवादपदं पदार्थमि
ति। सः शाब्दविशेषः। न चेत् मानमिति प्रासक्तेनान्वेपि। उभयथापि मानत्वेन मानत्वाभावे विवादः इति
सिद्धमिति इत्यनुनाप्रकारेणासिद्धं सर्वं सिद्धं। प्रमाणानां प्रमाणादिकं। प्रमात्वसिद्धौ प्रमात्वज्ञानेस्या
त्। तदेव। प्रमात्वज्ञानमेवतावत् प्रथमतः। असिद्धं नो त्यनां सर्वासिद्धं निपुणके पाठः। नहि तत्र

७४ त्वकमिति तत्प्रत्यदेव प्रमात्वज्ञानमेवातावत्प्रथमतः असिद्धं नोऽस्माकं स्वेव सिद्धे निपुणः पाठः॥ न
हि तत्प्रत्यक्षमिति तत्प्रत्यक्षमिति। तत्र प्रमात्वं प्रत्यक्षं प्रत्यक्षविषयः न हि त्यर्थः ज्ञानस्याऽतीन्द्रिय
७५ त्वादिति। ज्ञानस्यातीन्द्रियत्वे ज्ञानघटितमूर्त्तिकस्य प्रमात्वस्याप्युतद्रामतीनावः॥ अन्यथा ज्ञानस्यातीन्द्रियत्वानंगीकारे ज्ञा
नेतज्ज्ञानानां ज्ञानमेव स्यादिति। ज्ञानस्य ज्ञानविषयकज्ञानस्य ज्ञानं एतद्विषयकज्ञानस्य ज्ञानमेवमेवेदित्यर्थः॥ अत्र
नन्विप्यापांशंकायां गुरवः इति॥ इत्याहुरित्यत्रिमेरगांचयि॥ प्रकाशमेव स्वं प्रकाशो ज्ञानं यस्य तत्प्रं स्वेकीशमिति व्युत्पत्त्या
स्वयाहकमेकमेव स्वयाद्यमेतिवैफलितार्थः॥ ज्ञानं कर्तृ स्वात्मानं ज्ञानस्वरूपं स्वाधिकरणामात्मानं च ज्ञानाधि
करणामात्मानं च॥ अत एव ज्ञानसामान्यस्य घटादिरूपविषये स्वात्मस्वात्माधिकरणास्मविषये स्वात्मस्वाधि
करणास्य विषयत्वादेवास्मर्मे वर्मे ज्ञानं सकलमेव ज्ञानं घटमहं जानामीत्याकार इति॥ अयं घटो घटमहं जाना
मीत्याकार इति मत्रर्थः॥ अन्यथा घटमुख्यविशेष्यकज्ञानानिर्वाहः॥ इच ज्ञानस्य घटमहं जानामीत्याद्याकारक
त्वेच मिति मान्येय विषयत्वादिति मितिज्ञानं मातात्मावात्मामेयो घटादिः तद्विषयत्वात् त्रिपुटी प्रत्यक्षमिति ति
मात्रमेयनूपच्छितपपक्षनूपतेत्यर्थः॥ तन्नातद्गुरुवचनेन सम्यक्। कात्मकस्य स्वरूपस्य चाक्षुषादिज्ञाने लौ ७४
किक चाक्षुषादिज्ञाने विषयसन्निकर्षयोरपि विषयस्य लौकिकसन्निकर्षस्य च हेतुत्वात्कारणत्वात्प्रत्यक्षवि राम

षयसन्निकर्षयोः कारणयोरव्यवहितपूर्वक्षणे सत्त्वं दर्शयति॥ न चोत्पद्यमानमित्यादिना। पूर्वमसत्त्वे स्वपूर्व-
मसत्त्वे सन्निपूर्वत्वं वा स्वपूर्वसन्निकृष्टं वा तथा च घटादिज्ञाने योनात्पूर्वं स्वात्मकघटादिज्ञानं कथं ग्राह्यमिति भावः॥
चाक्षुषादीति। आदिना स्पार्शनपरिग्रहः। उद्भूतरूपवत एव द्रव्यस्येति। एवकारेणोद्भूतरूपद्रव्यभिन्नद्रव्यव्य-
वच्छेदः। अन्यथोद्भूतरूपवद्द्रव्यभिन्नद्रव्यस्य चाक्षुषादिज्ञाने योग्यत्वे निरूढसुप्रसिद्धं तथैव ज्ञाततयैव॥
अनुमेयं ज्ञानमिति अनुमानाकारकाइयं तता घटत्वप्रकारकज्ञानजन्यघटप्रकारकज्ञातताइज्ञायाइति॥
तदपि न हृद्वचनमपि न सम्यक् निरस्तत्वादिति। अतीतादिस्थले ज्ञाततायाः असंभवेन निरस्तत्वादित्यर्थः।
अप्रसिद्धौ। अनुमानात्पूर्वमसिद्धौ॥ अनुमानासंभवाच्च। अनुमित्यसंभवाच्च। उच्यते। अन्यथेत्यादीनां का-
यं समाधानमुच्यते योग्यत्वात्। निर्विकल्पकभिन्नबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नविशेषगुणानां योग्यत्वांगी-
कारात्॥ न चैवमिति। एवं ज्ञानस्य मनसा ग्रहेऽतः ज्ञानमपि मनसा ज्ञानविषयकज्ञानमपि स्यात्। एवं
अनेन प्रकारेणातः ज्ञानमपि ज्ञानविषयकज्ञानं ज्ञानविषयकज्ञानस्य न स्यज्ञानमपि स्यादिति पूर्व-
णान्वयि। इत्यनवस्था इति। नीत्यानवस्था तत्प्रतिबंधकत्व विषयांतरसंचारसामग्र्याः प्रतिबंधकत्वे किं मा-
नं किं प्रमाणं॥ पूर्वामुदय एव ज्ञानज्ञानविषयकज्ञानरूपपूर्वानुदय एव॥ तथापि ज्ञानस्य मनोग्राह्यत्वेऽपि

प

७५ तस्यज्ञानस्य प्रमाराग्यं॥प्रमात्वं तस्या मारायं साध्याप्रसिद्धः। प्रामाराय रूप साध्याज्ञानाअन्नत था पीत्याशंयां
मन्दाइतिद्दयनेनाच्यि॥ज्ञातत याज्ञातता रूप लिंगेन प्रामाराय मपि विषयीकरोतीति ज्ञानेज्ञानत्वमिव प्रमी
75 राय मपिविषयीकरोतीतिभावः॥ज्ञानमात्रस्य ज्ञानत्व मात्र विशिष्टस्य नाद्यः ज्ञातता याज्ञानमात्र स्यव्याप्ति
र्गृहीतेति प्रथमकल्पेन ततोज्ञातता रूपहेतोः ज्ञान मात्रे ज्ञातत्व मात्र विशिष्टं न तु तत्प्रमात्वमपि न तु तत्प्र
मात्व विशिष्टमपि न तु साध्यतावच्छेदकातिरिक्तेन रूपेरा। अन्यथा साध्यतावच्छेदकातिरिक्तेनापि रूपे
व्याप्त्या साध्यसिद्ध्यंगीकारे वह्निव्याप्योधूम इतिज्ञानात् पर्वतवह्निव्याप्योधूम इति ज्ञानात्॥ दहनसि
व्याप्त्यापत्ते वह्निसिध्यापत्तेः॥ नांत्यः। ज्ञाततायाः प्रमात्वस्य विशिष्टव्याप्तिर्गृहीतेति। अंत्यकल्पेन व्यभि
चारोत्। घटत्वादि भ्रमजन्यायां घटत्वादिप्रकारक ज्ञाततायां घटत्वादिप्रकारक प्रमायाः व्यभिचारात् न तु
घटत्व समानाधिकरण घटत्व प्रकारकज्ञातता वदत्व प्रमाव्याप्येवेत्यत आह। साध्याप्रसिद्धेश्चेति। प्रमा
त्व विशिष्टरूपं साध्य अनुमितेः पूर्वमसिद्धत्वेन यत्र घः। गुरवस्त्विति स्यात्तु दृत्यग्रिमेरा। अन्वयि। स्वप्रकाश ७५
न हि म्वा स्वप्रकाशत्व रूपोत्कर्षरां स्वत्वमिव स्वात्मके ज्ञानमिव स्वप्रामारायमपि स्वत्वाति प्रामाराय मपि
सिध्यति। स्वात्मकज्ञानस्य विषयो भवति। स्वप्रकाशतायाः सिद्धेरिति। चक्षुर्जन्य घटज्ञानादिना स्वात्म राम

नो विषयीकर्तुमशक्यत्वादित्यादिग्रंथेन स्वप्रकाशतायाः खंडितत्वादित्यर्थः॥ ननु गुरुमते ज्ञाननिष्ठमप्र
त्यक्षविषयता न सन्निकर्षनियम्या। न वा ज्ञानप्रत्यक्षे विषयः। कारणं किंतु तज्ज्ञानोत्पादिकासाम्ग्र्येवेति
ज्ञानविषयतानेयामिके क्लृप्ते तु ज्ञाने स्वप्रकाशता निराबाधपदमादधातीत्यत आह। किंचैवमित्यादि
एवं प्रामाण्यस्य स्वतोग्राह्यत्वे ज्ञाने प्रामाण्यसंशयो न स्यात्। इति। दूरे इदं जलमिति ज्ञानानंतरं कस्य
चित् इदं ज्ञानं प्रमा न वेति संदेहो जायते स न स्यादित्यर्थः। विज्ञाने ग्रहे प्रामाण्यनिश्चयादिति। मत
भते ज्ञानग्राहकस्योत्पत्तिकाले प्रमानिश्चयस्योत्पादनात्। ज्ञानग्रहे तस्यैव प्रामाण्यनिश्चयोत्सकत्प
त्वादिति पर्यवसितार्थः। निते प्रामाण्यप्रकारकमिथ्यपविशेष्ये ज्ञाने संशयायोगात्। प्रामाण्यप्रका
रकसंशयासंभवात्। ग्रग्राहे। ज्ञानाग्रहकाले प्रामाण्याग्रहे स्वप्रकाशत्वाक्षताव्याघातादिति। ग्राह
कसामग्र्याक्षताभावप्रसंगादित्यर्थः। ननु यस्मिन् ज्ञाने प्रामाण्यमोंशयो जायते प्रामाण्यसंशया
त्पूर्वं तदा तन्मपि न गृहीतेन स्वप्रकाशत्वाक्षताव्याघात इत्यत आह। धर्मिज्ञानाभावादिति। तथा च धर्मिज्ञा सं
नरूपकारणाभावात्॥ प्रामाण्यसंशयो न स्यात्। ननु संशये चक्षुरिंद्रियसन्निकर्षस्यैव कारणत्वे स्वी

७६ क्षिपतो ननु धूमज्ञानस्यापीत्यत आह। समानधर्मवत्त्वेत्यादि समानवत्तया तत्तदभावो भयकोटिसह
चरितत्धर्मवत्तया। अन्वयव्यतिरेकाभ्यां तादृशधर्मिज्ञानस्य वा सत्त्वयोः संशयस्य वा सत्त्वाभ्यां संशय
७८ हेतुत्वावधारणात्। संशयहेतुत्वावनिश्चयात्। तृतीयमीमांसकमतं महामुरारिमिश्राणामिति। एतन्म
ते ज्ञानमनुव्यवसायग्राह्यं तद्वद्विशेष्यत्वे सति घटत्ववद्विशेष्यकत्वे सति तत्प्रकारकत्वं घटत्वप्रका
रकत्वं प्रामाण्यं। प्रामाण्यपदवाच्यं तद्वद्घटत्ववद्विशेष्यकत्वे सति तत्प्रकारकत्वं च॥ तथाहि निरुक्त
प्रामाण्यस्य प्रथमानुव्यवसायग्राह्यत्वं ज्ञानीहि उपनीतः उपनयसलक्षणासन्निकर्षाश्रयः कृतः अ
तः घटत्ववता उपलक्षणासन्निकर्षाश्रयत्वात् तद्विशेष्यता घटकत्ववद्विशेष्यकता ससंरूपा घटत्वः
वदानयोः ससंपा ज्ञाने अयं घट इति ज्ञाने मनसा गृह्यते मनोजन्यग्रह विषयीभूता भवति तद्वतः घटत्व
वतः पूर्वमनोजन्यग्रह पूर्वकाले उपस्थित त्वात्। व्यवसायरूपोपस्थिति विषयत्वात् बहिरर्थेति। आत्मनस्त स
मवेत गुणात जाति तन्निष्ठाभाव भिन्नार्थस्य र्थः। उपनय सहकारेण ज्ञानलक्षणारूपसन्निकर्ष सह ७६
कारेणात स्यमनसः बहिरर्थप्रकाशत्वात्। पास्वार्थी विषयकज्ञानं जनकत्वात्। कथमिति ज्ञान मिस्य दाम

ग्निमेशानच्च पि। अन्यथा उपनयसहकारेणामनसो बहिरर्थप्रकाशज्ञाने कविकाव्यमूलभूतज्ञानं क
वेः काव्यमूलज्ञानं काव्यवर्णात्मकं कविकमनन्मूलभूतं तत्कारणीभूतं। ज्ञामानसवाक्यार्थज्ञानं व
केः कथमिति अनुव्यवसाये घटमहंजानामीत्यनुव्यवसाये विषयप्रतिभानं घटादिरूपविषयवि
षयकत्वं व्यवसायेनैव अयं घट इति व्यवसायेऽपनीतं उपनयलक्षणासन्निकर्षाश्रयीकृतं॥
अतः घटत्वस्य उपनयलक्षणासन्निकर्षाश्रयत्वात्। तत्प्रकारकज्ञाने घटत्वप्रकारतानिरूपिता
देवे विषयतातुल्या घटत्वे ज्ञानयोः संसर्गरूपानुग्रहाने मनसा गृह्यते॥ विशेषणघटत्वस्य पूर्व
मुपस्थितत्वात्। उभयस्य घटत्ववद्विशेष्यकत्वे घटत्वप्रकारकत्वोभयस्य एकस्मिन्नयं घट इति
ज्ञाने। तदपि मुराणादि भिन्नमननमपि न न सम्यक्। एवं हि एकस्मिन् ज्ञाने घटत्ववद्विशेष्यक
त्वविशिष्टघटत्वप्रकारकत्वानयच्यहेति तद्विशेष्यकत्वं। घटत्ववद्विशेष्यकत्वे तत्प्रकारक
घटत्वप्रकारकत्वं गृहीतं अनुव्यवसायेन विषयीकृतं। एवं तद्विषयेकैकत्वप्रकारकत्वोभय

७७ मेव सामानाधिकरण्यं सामानाधिकरण्यपदवाच्यं। तद्विशेष्यकत्वविशिष्टतत्प्रकारकत्वं घटत्ववद्विशेष्यकत्वे घ
77 टत्ववद्विशेष्यकत्वे विशिष्टघटत्वप्रकारकत्वं सामानाधिकरण्यमिति पूर्वेणान्वयि। घटत्वप्रकारकत्वघटत्व
वद्विशेष्यकत्वे वैशिष्ट्यं च सामानाधिकरण्यसंबंधेन बोध्यं। तद्विशेष्यकत्ववैशिष्ट्यं घटत्व
वद्विशेष्यकत्ववैशिष्ट्यगर्हानुविषयीकर्त्तुं तद्विशेष्यकस्य घटवद्विशेष्यकत्वस्य पूर्वमनु
व्यवसायपूर्वमनुपस्थितिरज्ञानान्नानुकर्षं तर्हि तद्विशेष्यकत्वतत्प्रकारकत्वे चानुव्यवसा
यविषय इत्यत आह। संसर्गविधया वेति। संसर्गविधया घटत्ववतोः घटत्वस्य च संबंधविधया हि
रवधारणे भाष्यते। अनुव्यवसायविषयो न वेति। किं च। तदपि इत्यादि एतदपि सामानाधि
करण्यसंबंधेन घटत्ववद्विशेष्यकत्वे घ विशिष्टघटत्वप्रकारकत्वमपि। अपि कादेशात् घटत्व
वद्विशेष्यकत्वघटत्वप्रकारकत्वानयपरिग्रहः। न सामानाधिकरण्यं। न सामानाधिकरण्यपदवाच्यं। वह्नि ८०
गुञ्जयोर्गुञ्जा वह्नीति च मे इति गुञ्जायां वह्नित्वावगाहीव ह्रे गुञ्जात्वावगाही घः समूहालंब राम

नात्मान्तमः॥ तस्मिन्निति स्वपदेः॥ अतिवर्त्तते हि हेतौ तत्र निर्युक्तस्य मूलालंबनत्वमेव वह्निविशेष्य
कात्वं विशिष्टत्ववह्निविशेष्यकत्वं वह्नित्वप्रकारकत्वं चेति तथा च सामानाधिकरण्यसंबंधेन वह्नि
त्ववह्निविशेष्यकत्वविशिष्टवह्नित्वप्रकारकत्वमपि स्फुटतरमेवास्तीति भावः॥ तद्विशेष्यकत्वा
वच्छेदेन तत्प्रकारत्वं घटत्वप्रकारकत्वं घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकमिति पा
ठतः। इत्यकं प्राचीनैरुक्तं। तत्प्रकारकत्वे तद्विशेष्यकत्वावच्छिन्नत्वं च स्वरूपसंबंधविशेषः
अवच्छेद्यावच्छेदकभावः॥ तद्विशेष्यकत्वतत्प्रकारकत्वयोरवच्छेद्यावच्छेदकभावः प्रथमं प्र
थमानुव्यवसायविषयः। तद्विशेष्यकस्य घटत्ववद्विशेष्यकत्वं पक्षे उच्यते सिद्धसाधनं। अस्तां तिष्ठ
तु। न भवतु प्रथमानुव्यवसायेन प्रामाण्यग्रहः॥ प्रथमानुव्यवसायेन प्रामाण्यविषयत्वं। अस्तामि
ति पाठः सुगमः॥ अत्र मा ज्ञाद्धेनिवधार्यकोनेतु माडः ज्ञात॥ न नन्वेद्वनुपपत्तिः॥ अन्यथानुव्यव स्या
दिति। द्वितीये द्वितीयानुव्यवसायेन स्यात् प्रामाण्यग्रहः स्यादेतत्। तद्वि विशेष्यकत्वस्य घटत्ववद्वि
शेष्यकत्वस्य पूर्वं द्वितीयानुव्यवसायात्पूर्वं प्रथमानुव्यवसायेनोपस्थितेति प्रथमानुव्याद

सायामित्योपस्थितैर्दिव्यर्थः। न चैव मिति। एवमेवमनेन प्रकारेण प्रामाण्यस्य तद्विशेष्यकत्वावच्छे
७८ देन तत्प्रकारकत्वस्य अनुव्यवसायगम्यत्वे अनुव्यवसायविषयत्वे प्रामाण्यसंशयो न स्यात्। अज्ञा
78 ने प्रामाण्यसंशयो न स्यात्। दोषविशेषात् प्रामाण्यग्रहप्रतिबंधकीभूतदोषविशेषात्। यत्र यस्मि
ज्ञाने प्रामाण्यं तद्विशेष्यकत्वसति तत्प्रकारकत्वं न गृहीतं न विषयीकृतं। तत्र तस्मिन् ज्ञाने संशा
यसंभवात् प्रामाण्यसंशयसंभवात्। अन्यथानिनुकारेण संशयानुपगमे पुरुषत्वसंयोपि
तस्य पुरुषत्वस्य चक्षुर्वैद्यत्वात्। चक्षुर्जन्य निर्विकल्पात्मकज्ञानविषयत्वात्। तथाच पददादो
षवशात् पुरोवर्तिनि पुरुषत्वं न गृहीतं। तदा पुरोवर्तिनि पुरुषत्वसंशयः तथा पदादोषवशाद
व्यवसायेन ज्ञाने प्रामाण्यं न गृहीतं तदा ज्ञाने प्रामाण्यसंशयोऽइति भावः। न चैव मिति एवं प्रामा
ण्यस्य द्वितीयानुव्यवसायग्राह्यत्वे प्रतिबंधके प्रामाण्यग्रहः प्रतिबंधके पावदाश्रयानुव्यवसायग्राह्यत्व
मिति पावेत्। आश्रयस्य अनुव्यवसायग्राह्यत्वं। तत्र द्विषयत्वं हि स्वधावधारणेभिमतः। नयेनु
द्रादिमिश्रनेये स्वतोग्राह्यत्वं प्रामाण्यस्य स्वतोग्राह्यत्वं घतादृशस्वतोग्राह्यत्वेन न प्रामाण्यतत्र ७८
ग्रहात्। अविषयीकरणात्। एवं च द्वितीयानुव्यवसायेन साध्ये प्रसिद्धौ। साध्यज्ञानेन दूहकप्रा राम

माण्यग्राहकं। तद्यथा प्रामाण्यग्राहकमनुमानं। यथा इदं पुरुषज्ञानमिति॥ इदं च तत्पुरुषज्ञानं चेति वि
ग्रहात्। एतत्पुरुषज्ञानमित्यर्थः॥ प्रमा पुरुषत्ववद्विशेष्यकत्वावच्छिन्नपुरुषत्वप्रकारकत्ववज्ज्ञानत्वा
त्। संप्रतिपन्नवदिति। अनुव्यवसायगृहीप्रामाण्यकपुरुषज्ञानवदित्यर्थः। कल्प्यातमाह। यद्वेत्यादि। यन्नैव
मिति। यत्र पुरुषत्ववद्विशेष्यतोकेवच्छिन्नपुरुषत्वप्रकारकवत्। तन्नैवमिति। तन्न करादिमद्विशेष्यकत्वा
वच्छिन्नपुरुषत्वप्रकारकत्ववदिति। व्यतिरेकी हेतुः। अप्रामाण्याभाव एव एवत्व तदभाववद्विशेष्यकत्वा
वच्छिन्नप्रकारकत्वरूपाप्रामाण्याभावरूपमेवाप्रामाण्यं। प्रामाण्यपदवाच्यं। व्यतिरेकिणां निरुक्तहेतु
नेति शेषः साधनीयं। साध्याप्रसिद्धिः। अप्रामाण्याभावप्रसिद्धिः। व्यतिरेकिनानुमानेन साध्यहेत्वोः
अप्रामाण्याभावरूपसाध्याकरादिमद्विशेष्यकत्वावच्छिन्नपुरुषत्वप्रकारकत्वहेतोः साध्याभावत्वेभावयो
रिति अप्रामाण्याभावकरादिमद्विशेष्यकत्वावच्छिन्नपुरुषत्वप्रकारत्वोकेभावयोरित्यर्थः। किं दत्तप्रसिध्या
किं साध्याप्रसिध्याप्रसिद्धौ अप्रामाण्याभावरूपसाध्याप्रसिद्धौ तदभावाप्रसिद्धिः। अप्रामाण्याभावा
भावं प्रसिद्धिः। प्रतियोगिज्ञानसाध्यत्वादभावज्ञानस्येति। अप्रामाण्याभावज्ञाने जन्यत्वात्। अप्रामा
ण्याभावाभावे ज्ञानस्येत्यर्थः। तस्या अप्रामाण्यारूपप्रतियोगिज्ञाने सं अमारूपं अप्रामाण्याभाव

७८ ज्ञानं न वा प्रामाण्याभावत्वेन अप्रामाण्याभावाभावज्ञाने अप्रामाण्याभावरूपप्रतियोगिज्ञानं कारणं भवत्येवेति
वाच्यं। अप्रामाण्यत्वेन प्रामाण्याभावाभावज्ञाने अप्रामाण्याभावप्रतियोगिज्ञानस्य हेतुत्वे मानाभावात्॥
79 एवं च साध्याभावहेतुभावयोर्व्याप्तिग्रहे च पक्षे व्यापकतया अप्रामाण्यव्यापकतया हेतुत्वभावः पक्षे त्वभा
वः करादिमद्विशेष्यकत्वावच्छिन्नपुरुषत्वप्रकारकत्वाभावः गृहीतः निश्चितः। तेन हेतुना करादिम
द्विशेष्यकत्वावच्छिन्नपुरुषत्वप्रकारकत्वेन हेतुना तदभावः अप्रामाण्याभावः तद्विशिष्टज्ञानरूपा
नुमितिः साध्यविशिष्टज्ञानरूपानुमितिः अप्रामाण्याभावविशेष्यकायाः ज्ञाने अप्रामाण्याभाव
इत्याकारिकायाः साधनं। तथापि तत्प्रथमं अप्रामाण्याभावरूपप्रामाण्यस्य व्यतिरेकिणा साधनं। त
थापि प्रथमं व्यतिरेकिणा अप्रामाण्याभावरूपप्रामाण्यसाधनेपि तदितितत्प्रकारकत्वग्रहे तद्विशे
ष्यकत्वावच्छिन्नतत्प्रकारत्वग्रहे तु कैव गतिः। प्रथमं द्वितीयानुव्यवसायेन प्रामाण्यग्रहस्तदनेरेतेम
न्वयिना व्यतिरेकिणा वा अनुमानेन प्रामाण्यग्रहः अप्रामाण्याभावरूपप्रामाण्यमपि प्रथमं व्यतिरे
कानुमानेन ग्रहीतुं न शक्यमित्याह। किंचेत्यादि। करादिमति पुरुषत्वज्ञानं करादिमद्विशेष्यकत्वा ७७
वच्छिन्नपुरुषत्वप्रकारकत्ववज्ज्ञानीयो हेतुः पुरुषत्ववति तत्प्रकारकत्वग्रहः। पुरुषत्ववद्विशे राम

ष्यकत्वावच्छिन्नपुरुषत्वप्रकारकरूपप्रामाण्यग्रहः केन वार्यतां केन प्रतिबध्यतां। यतः प्रतिबंधकात् तंअ
अनुव्यवसायेन प्रामाण्यग्रहं अपहाय स्वत्को एषः प्रथमम प्रामाण्याभावरूपप्रामाण्यरूपकुस्वस्याद्द इति कु
स्सितास्वच्छिन्नत्तस्याद्दः तत्प्रकारकत्वज्ञानमेव रजतत्वप्रकारकत्वज्ञानत्वमेव एवकारेण रजतत्वावच्छिन्नशेष्य
कत्वावच्छेदः प्रामाण्ये रजतज्ञानप्रामाण्ये प्रमाणं स्यात् प्रमाणं स्यात् तदसिद्धेः। रजतत्वप्रकारकत्वं शुक्तिः ज्ञा
नासिद्धेः शुक्तिज्ञानस्य रजतत्वप्रकारकत्वासिद्धेः ज्ञानीयरजतत्वप्रकारतायां शुक्तिविशेष्यतानिरूपि
त्वासिद्धेश्च इति पर्यवसितार्थः। तत्र तत्प्रकारकज्ञाने तदभाववद्विशेष्यकतत्प्रकारकरकज्ञाने ज्ञानीय
तन्निष्ठप्रकारतायां तदभाववद्विशेष्यकतत्प्रकारकज्ञाने ज्ञानीयतन्निष्ठप्रकारतायां तदभाववद्विशे
ष्यतानिनिरूपितत्वे मानं प्रामाण्यं अस्ति विद्यते कथमिति व्यवहार इत्यनेनाच्यपि। तर्हि तदभावव
द्विशेष्यकतत्प्रकारकज्ञानानंगीकारे शुक्ताविति शुक्तिविशेष्यक इत्यर्थः। विषयता च व्यापारानुबंध
नाबोध्या प्रयोगः प्रयुज्यमान इत्यर्थः। तत्र शुक्तौ व्यवहर्त्तव्यरजतत्वासंसर्गाग्रहादिति व्यवहर्त्तव्यं।
व्यवहारविषयीभूतं यद्रजतत्वं तस्य असंसर्गाग्रहात् विशेष्यतासंबंधावच्छिन्नप्रतियोगिताकसंस
र्गाभावस्य ज्ञानाभावात्॥ शुक्तौ प्रवृत्तिरपि विशेष्यतासंबंधेन प्रवृत्तिरपि तत्र शुक्तौ इष्टतावच्छेदकरजतत्व
स्यासंसर्गाग्रहादिति। इष्टतावच्छेदकं इच्छाविषयतावच्छेदकं यद्रजतत्वं तस्यासंसर्गाग्रहात् विषय

तासंबंधावच्छिन्नप्रतियोगितासंबंधेनरजतत्वप्रकारकप्रवृत्तिं प्रतिरजतत्ववत्ताप्रकारकज्ञानंविशेष्यतासं
८० बंधेनरजतत्वप्रकारकज्ञानंप्रमास्थलेरजतत्वप्रकारकंयथार्थप्रवृत्तिस्थले। तथाचरजततत्वप्रवृत्तिं प्रतिरज
९० ततत्वप्रकारकज्ञानस्यहेतुत्वंचतेनचिताविशेष्यतासंबंधेनरजतत्वप्रकारकज्ञानेनविनाथंकेशुक्तौप्रव
त्तिः। कथंशुक्तौविशेष्यतासंबंधेनरजतत्वप्रकारिकाप्रवृत्तिः तत्रापितद्रजतत्वप्रकारकयथार्थप्रव
त्तिस्थलेपिरजतत्वसंसर्गोऽयस्येहेसंसर्गाभावग्रहाभावस्यअविशेषात्। नजतारजतयोर्द्वैलक्षण्या
त्। कचित्संवादिनीप्रवृत्तिःरजतेयथार्थाप्रवृत्तिः क्वचिन्नसंवादिनी। तीति। अरजतेअयथार्थाप्रवृत्तिःइ
तीतिनियमइत्यनेनान्वपिकुतः कस्मात्तद्धितिदतसंसर्गाग्रहस्यरजतत्वसंसर्गाभावस्यतत्प्र
कारकसंवादिन्यांरतेजत्वप्रकारकसंवादिन्यांप्रवृत्तौतदभाववतितद्संसर्गाग्रहस्यरजतत्व
नाववतिष्ठरजतत्वरजतत्वासंसर्गाभावग्रहाभावस्यतत्प्रकारकसंवादिन्योरजतत्वप्रकारके
विसंवादिन्याञ्चजोच्यतइति। अत्रअन्येषांमते। उच्यते। इत्थमामुच्यते। मोरवात्तारजतत्वप्रकार ८०
कसंसर्गाग्रहत्वापेक्षयारजतत्वासंसर्गाग्रहत्वस्यगुरुत्वात्। शुक्तौतद्संभवः शुक्तौविशेष्य राम

ता संबंधेन जैदेतत्वसंसर्गाग्रहस्संभवः न योर्विशेषणविशिष्टयोः असंसर्गाग्रहः अ
संसर्गाग्रहाभावः इत्येव हि स्थितिः। एतावदेव हि तात्पर्यं॥ विशिष्टज्ञानहेतुः विशिष्टज्ञानोप
ध्यायकं॥ अत्रापि प्रयुक्तिः विशेष्यताकरजतत्वप्रकारकप्रवृत्त्यव्यवहितप्राक्क्षणे पितयोः
शुक्तिरजतत्वयोः तत्प्रकारकं रजतत्वप्रकारकं संनिहिते सन्निकृष्टं परत्रयस्याभावस्य
अव्यवहितपूर्वक्षणे तन्नेदृश्यमस्य अव्यवहितपूर्वक्षणे अन्यत्र च संनिकृष्टे रजत
स्थले ज्ञानस्य ज्ञानलक्षणास्य रजतत्वप्रकारकप्रत्यक्षस्य रजतविशेष्यकरजतत्वप्रका
रकं प्रत्यक्षं॥ तन्मे वच रजतविशेष्यकरजतत्वप्रकारकरकक प्रत्यक्षमेव तत्प्रकारिकाप्र
वृत्तिकाप्रवृत्तिरिति। अरजतविशेष्यकरजतत्वप्रकारिकाप्रवृत्तिरित्यर्थः॥ ॥छ॥ छ॥
इति श्रीगोविंदन्यायालंकारभट्टाचार्यात्मजश्रीरुद्रन्यायवाचस्पतिभट्टाचार्यविरचितायां

सिद्धांतमंजरीटीकायां चतुर्थव्याख्या समाप्ता ॥छ॥ श्रीरस्तु ॥छ॥

ध्याय

१.८.